૧ શંકાવાળો. ૨ આંસુથી વ્યાપ્ત. ૩ શોકરૂપી તાવ વડે જીર્ણ બનેલો. ૪ ત્યાં સુધી.

[८१]

पियस्स छिन्नंगदंसणे खयरीए रोयणं ।

अह पडिओ गयणाओ, मणि-कंचण-भूसणो सहाइ भुओ ।
तं दट्ठूं खयर-वहू, रुयमाणी भणिउमाढत्ता ॥

जो कंठेऽलंकारो, जाओ गंडत्थलेसु उवहाणं ।
कन्नेसु य अवयंसो, सो मज्झ पियस्स एस भुओ ॥

अह नह-यलाओ चलणो, मणि-कणयाहरण-भूसिओ पडिओ ।
तं पिक्खिउं स-खेया, खेयर-रमणी भणइ एवं ॥

अब्भंगिऊण उव्वट्टिओ, चिरं ण्हालिओ विलित्तो य ।
निय हत्थेण मए जो, सो पाओ एस मह पइणो ॥

पडिओ बीओ वि भुओ, खणेण पाओ वि निवडिओ बीयो ।
पडिया य [1]मुंड-रुंडा, ते दट्ठुं खेयरी रुयइ ॥

जं मंडियं मए कुंडलेहिं तं मे पइस्स मुहमेयं ।
तं हिययमिणं जस्सि, मज्झे बाहिं च वसियम्हि ॥

हा नाह ! सत्त-सत्तम !, दढ-विक्कम ! पबल-बाहु-बलकलिय ! ।
छलिओ सि [3]छिलन्नेसण-परेण अरिणा विहि-वसेण ॥

हा ! किं करेमि ?, कस्स च कहेमि ?, सरणं च कं पवज्जामि ? ।
तुमए विणा अणाहा, अहं अहन्ना इमा जाया ॥

—कुमारवालपडिबोहे पु० १३४–१३५ ।

१ ઓસીકું. ૨ મસ્તક અને ધડ. ૩ છળને શોધવામાં તત્પર.

[८२]

पुत्तावहारे रुप्पिणीए पलावो ।

अह रुप्पिणी कुमारावहार-गुरु-सोय-भरिय-सव्वंगा ।
मुच्छा-निमीलियच्छी, धस त्ति धरणी-यले पडिया ॥

सिसिरोवयार-संपत्त-चेयणा पसमिउं व सोयग्गिं ।
सा बाह-सलिल-पूरं, मिल्लंती पलवए एवं ॥

हा चंदवयण! हा कमल-नयण! हा वच्छ! लच्छि-कुल-भवण!।
हा नियवंस-विभूसण! हा किसलय-अरुण-कर-चलण! ॥

खिविऊण ममं दीणं, दुस्सह-सोयानलंमि पजलंते ।
अगणिय-जणणि-सिणेहो, पुत्त! तुमं कत्थ पत्तो सि? ॥

निल्लक्खणा अहं चिअ, निब्भग्ग-सिरोमणी अहं चेअ ।
जं परिहरिऊण ममं, पुत्त! तुमं कत्थ वि गओ सि? ॥

हा तणय! कणय-सच्छह[1]!, जीवंति लोयणेहिं एएहिं ।
किं तुज्झ वयण-कमलं, कयाइ पुणरवि पलोइस्सं? ॥

कण्हो वि जाय-सोगो, विलवइ सह जायवेहिं हा वच्छ! ।
केणावि वेरिएणं, एक्कपए चेव हरिओ सि ॥

हा दिव्व! मह [2]विलीयं, किं दिट्ठं? जं तए सुय-मिसेण ।
आरोविऊण भवणे, कप्प-तरू एस अवहरिओ ॥

—कुमारवालपडिबोहे पु० २६० ।

१ સદશ. ૨ અપરાધ.

[८३]

नडधूआए आसत्तं इलापुत्तं पडुच्च पिउणो वयणाइं ।

तं सोउं सो वज्जाहओ व्व सहसा विसायमावन्नो ।
बाह-जल-सरिय-नयणो, स-प्पणयं जंपए पुत्तं ॥
उत्तम-कुलम्मि जाओ, वच्छ ! तुमं तुह मणोहरा मुत्ती ।
तुज्झ विसुद्धा बुद्धी, सत्थ-रहस्सं तए पढियं ॥
जुत्ताजुत्त-विमरिसं, न खमो काउं विणा तुमं अन्नो ।
ता कत्तो जायमिणं, तुह गुण-विवरीयमायरणं ? ॥

तहा—

जेण कुलं कलुसिज्जइ, सुयणा खिज्जंति उल्लसंति खला ।
कंठ-गय-जीविया वि हु, सप्पुरिसा आयरंति न तं ॥
मुणिऊण इमं राया, काही सव्वस्स निग्गहं मज्झ ।
लज्जिस्सए गुरुयणो, कओ कुपत्ते किलेसो त्ति ॥
संभाविस्संति तुमं, अकुलीणं नयर-सिट्ठिणो नूणं ।
निय-पंति-बाहिरं मं, सयण-गणा पुण करिस्संति ॥
ता निरुवम-रूवाणं, लायन्नामय-समुद्द-लहरीणं ।
वच्छ ! कुल-कन्नगाणं, कर-गहणं कारविस्सामि ॥
जं वच्छ ! वंछसि इमं अकुलीणं मणहरं पि तमजुत्तं ।
चंडाल-कूव-सलिलं सिट्ठो, सिसिरंमि किं पियइ ॥

—कुमारवालपडिबोहे पु० २०० ।

[८४]

इलापुत्तस्स पच्छायावो ।

जेणेस निवो रंगो व जीवियाए इमीइ अणुरत्तो ।
मम मरणनिमित्तं कारवेइ [1]करणाइं पुणरुत्तं ॥
संते वि रूवलावन्नकंतिमंते महंतसुद्धंते ।
अकुलुग्गयाइ किमिमीइ पत्थिवो एस अणुरत्तो ॥
अहवा किमणेण अहं पि एरिसो चेव जेण वट्टामि ।
दूरे [2]नियइ जलंतं, ता लोओ न उण पायतले ॥
धिद्धी ! मह जम्ममिणं, जेण न लज्जा कया गुरुजणस्स ।
जणणिजणयाण दुक्खं, मणं पि न निरूवियं जेण ॥
परिभावियं न चित्ते लोए लहुयत्तमत्तणो जेण ।
जेणोभयलोयभयं, न थेवमेत्तं पि संभरियं ॥
उमग्गविलग्गेणं, मत्तगएण व निंठरहिएण ।
परपुट्ठवालएण व परघरसंचरणसीलेण ॥
भक्खाभक्खविभागं, अपेक्खमाणेण हुयवहेणेव ।
गिरिनइपयपूरेण व नीयं चिअ वच्चमाणेण ॥
[3]विसरुक्खेण व नीसेसलोयउव्वेयकरणदक्खेण ।
सयलजणगरहणिज्जं, [4]लंखयकुलमणुसरंतेण ॥
अहह मए मूढेणं, कओ कलंको कुलम्मि ससिविमले ।
सयणाणं वयण-सरोरुहेसु मसि-कुच्चओ दिन्नो ॥

---

१ नृत्यकळामां विविध चेष्टाओने. २ देखे छे. ३ विषवृक्षनी जेम. ४ नटना कुळने. ५ शाहीनो कूचडो.

[1]उद्धूलियं समग्गं, तइलोक्कं अयस-पंसु-पसरेण ।
अप्पा अणप्प-दुग्गइ-दुक्खाणं भायणं विहिओ ॥
हा रूवमेत्त-दंसण-लोल-सहावत्तणेण सलह-समे[2] ! ।
पाविट्ठि-दिट्ठि-रंडे !, पंच इमे मंडया तुज्झ ॥

—कुमारवालपडिबोहे पु० ३०२–३०३

[८५]

दिक्खागहणसमए अम्मापिऊहिं सद्धिं सुबाहुकुमरस्स संवाओ ।

तुब्भेहिं अणुन्नाओ, पव्वज्जं संपयं पव्वज्जिस्सं ।
सोउं एयमणिट्ठं, वयणं देवी गया मुच्छं ॥ ६८ ॥
सत्थीकया य कलुणं, विलवंती भणइ दीणवयणगिरं ।
" जाय ! तुमं मह जाओ, बहुओवाइयसहस्सेहिं ॥ ६९ ॥
ता कह ममं अणाहं, पुत्तय !, मुत्तुं गहेसि सामण्णं[3] ? ।
सोयभरभरियहियया, वच्चिहिं(ही?) हा मज्झ जीयंपि ॥७०॥
ता अच्छह जावऽम्हे, जीवामो तो पवुड्ढसंताणो ।
पच्छा कालगएहिं, अम्हेहिं तुमं गहिज्ज वयं ॥ ७१ ॥"
भणइ इमो " मणुयभवे, अम्मो ! अधुवे असासए[4]ऽनियए ।
संझब्भरागसरिसे, कुसग्गजलबिंदुयसमाणे ॥ ७२ ॥

---

१ धूळथी व्याप्त कर्युं. २ पतंगियाना समान. ३ साधुपणाने. ४ अनित्य.

वसणसयसमभिभूए, विज्जुलयाचंचले सुमिणतुल्ले ।
खणभंगुरे अणिच्चे, पुव्विं पच्छा व चइयव्वे ॥ ७३ ॥
अन्नं च न याणामी, अम्मो ! मरणं धुवं भविस्संपि ।
किं पुव्विं पच्छा वा, तुज्झेहिंतो महं होइ ? ॥ ७४ ॥
जम्हा मच्चू न मुयइ, बालं वुड्ढं जुवाणयं [2]निस्सं ।
धणवंतं वा धणियं, जलिओ जलणुव्व जणनिवहं ॥ ७५ ॥
ता अणुजाणह अम्मो, ! इण्हिंपि हु संजमं पवज्जामि " ।
तो तं अम्मापियरो, जंपंति पुणो वयणमेयं ॥ ७६ ॥
" जाया ! सरीरगं ते, इणमो सव्वंगसुंदरमुदारं ।
वरलवणिमसंपुण्णं, समग्गसोहग्गगुणकलियं ॥ ७७ ॥
कइवयदिणाइं तो, माणिऊण भोए अणुत्तरे पुत्त ! ।
अणुहविउं नियतणुरूवसंपयं पव्वइज्ज तओ " ॥ ७८ ॥
अह कुमरो भणइ इमं, " दुक्खाययणं खु अम्मताय ! तणू ।
ण्हारुसयसंपिणद्धं, अट्ठियकट्ठुच्छियं असुइं ॥ ७९ ॥
विविहाहिवाहिगेहं, तह य अणिट्ठट्ठविसयसंठप्पं ।
जज्जरघरं व जं सडणपडणविद्धंसणसहावं ॥ ८० ॥
दुब्बलयं मट्टियभंडयं व एयं पुरा व पच्छा वा ।
चइयव्वमवस्सं तो, इण्हिंपि हु पव्वयामि अहं ॥ ८१ ॥ "
पियरो पिम्मपराइं, पुणोऽवि कुमरं इमं पयंपंति ।
" सुंदरसरित्तियाओ, सरिव्वयाओ सुरूवाओ ॥ ८२ ॥

---

१ त्याग करवा लायक. २ धनरहितने. ३ श्रेष्ठ.

भत्ताओ अणुरत्ताओ, सुविणयजुत्ताओ तुज्झ भज्जाओ ।
पंचसयाइं इमाओ, कह मुंचसि तं अणाहीओ" ? ॥ ८३ ॥
अह कुमरो भणइ "इमे, भोया असुइब्भवा असुइणो य ।
वंतासवा य पित्तासवा य तुच्छा अणिच्चा य ॥ ८४ ॥
किं च मए बहुसोऽवि हु, भुत्ता भोगा सुरासुरनरेसु ।
न य मणयंपि हु तैत्तो, नैइनियरेणं व नीरनिही ॥ ८५ ॥
अण्णं च इमे आवायसुंदरे परिणईय दुहजणए ।
किंपागफलसरिच्छे, को सेवेज्जाऽवि य सैयण्णो ?" ॥ ८६ ॥
तो तं पुणो वि पियरो, भणंति "मणिरयणकंसमाईओ ।
अत्थो अज्जयपज्जय–पमुहेहिं समज्जिओ बहुओ ॥ ८७ ॥
आसत्तमकुलवंसा, दाउं भुत्तुं पकाममवि होही ।
तं अणुभुंजिय पच्छा, पुत्तय ! गिण्हिज्ज पव्वज्जं" ॥८८॥
भणइ सुबाहू "सुबहू वि संचिओ अत्थसंचओ अथिरो।
जलजलणरायतक्कर-मच्चुप्पमुहाण साहीणो ॥ ८९ ॥
दुहसज्झो दुहरक्खो, वहबंधकिलेसकारओ सययं ।
अत्थो अणत्थभवणं, इह परलोए य जीवाणं" ॥ ९० ॥
अह तं अम्मापिउणो, जाणित्ता सव्वहा विसयविमुहं ।
संजमभयजणणीहिं, वैंग्गूहिं वयंति तो एवं ॥ ९१ ॥

---

१ स्वामीथी रहित. २ तृप्त. ३ नदीओना समूह वडे. ४ सावधान अथवा पंडित. ५ वचनो वडे.

"वच्छ ! इमं निग्गंथं, पावयणमणुत्तरं तहा सच्चं ।
केवलियं मुत्तिकरं, किंतु सुदुक्करतरं सुणसु ॥९२॥
चावेयव्वा जह लोहनिम्मिया दुक्करं जवा इहइं ।
चंकमियव्वं निसियग्गखग्गधारोवरिं अहवा ॥ ९३ ॥
इच्चाइ दुक्कराइं, हवंति जह वच्छ ! जीवलोगंमि ।
तह तारुण्णे सुहलालियस्स समणत्तणंपि जओ ॥ ९४ ॥
समणाण न कप्पंती, आहाकम्माइं भत्तपाणाइं ।
सहियव्वा य अवस्सं, बावीस परीसहा दुसहा ॥ ९५ ॥
लुंचेयव्वा केसा, न बीहियव्वं तहोवसग्गेहिं ।
इच्चाईहिं चरित्तं, मुहुत्तमवि दुक्करं काउं " ॥ ९६ ॥
तत्तो जंपइ कुमरो, " जं तुब्भे भणह दुक्करं चरणं ।
तं सच्चं किं पुण कायराण कीवाण पुरिसाणं ॥ ९७ ॥
धीरस्स निच्छियस्स उ, न य किंचि वि इत्थ दुक्करं मण्णे ।
ता अणुमण्णह जं वीरअंतिए पव्वयामि लहुं " ॥ ९८ ॥
जाहे अम्मापियरो न हु से चायंति तं नियत्तेउं ।
ताहे अकामयाए निक्खमणं तस्स मण्णित्था ॥ ९९ ॥

—सद्दिणकिच्चवित्तीए प० ३, पु० ३०५–३०६

---

१ शक्तिमान थया. २ दीक्षा लेवाने माटे निकळवाने.

सुद्धिपत्तं ।

असुद्ध	सुद्ध	पु०	पं०
एक्किय	एक्कियं	७	१७
—मघञ्ञ	—मधञ्ञ	७	१८
भंद्-	मंद्-	११	११
भरोझो	भरेलो	३०	१९
सु	सुद्धु	४०	१०
गम्मागम्म वि-भागा	गम्माग-म्मविभागा	६३	१३
कोाडयानी	कोडियानी	७३	२०
दार्ितएण	दार्वितएण	१२१	१३
सययम्मि	समयम्मि	१३०	१३
घणसिरी	धणसिरी	१३२	२
”	”	”	४
”	”	”	१४
वग्घम-	वग्घभ-	१३४	१
हिऊणं	गहिऊणं	१३५	३
दट्टूं	दट्ठुं	१४२	११
कभल	कमल	१४३	६

इअ करुणरसकंदंबके पाइओ

पढमो खंडो समत्तो ।

॥ अर्हं नमः ॥

नेमिविज्ञानग्रन्थमाला--रत्न ६

॥ करुणरसकदम्बकम् ॥

सङ्ग्राहकः सम्पादकश्च

सूरिसम्राट्-प्रौढप्रभावशालि-तपागच्छाधिपति तीर्थोद्धारक-युगप्रवर-श्रीमद्विजयनेमिसूरीश्वरपट्टालङ्कार—शान्तमूर्ति-समयज्ञाचार्यदेव-श्रीविजयविज्ञानसूरीश्वरशिष्यरत्नमहामहोपाध्याय-कस्तूरविजयगणिविनेयमुनिश्रीयशोभद्रविजयशिष्यमुनिश्री-शुभङ्करविजयः ।

प्रकाशकः

राजनगरनिवासी संघवी जीवणभाई छोटालाल

डोशीवाडानी पोळ : अहमदाबाद.

वीर सं० २४६७] प्रथमावृत्तिः [विक्रम सं० १९९७

प्राप्तिस्थान
शा. चंदुलाल उमेदचंद रायचंद मास्तर
ठे० पांजरापोळ, अमदावाद.

मुद्रक
मूलचन्द किसनदास कापडिया
'जैनविजय' मुद्रणालय, गांधीचौक, सुरत.

परमपूज्य प्रातःस्मरणीय जैनाचार्य



श्रीमान् विजयविज्ञानसूरीश्वरजी महाराज

॥ अर्पणपत्रिका ॥

श्रीमत् 'तपा' गणगगनाङ्गणगगनमणि–तीर्थरक्षा-परायणैकलक्ष्यकोविदकुलालङ्कार–सूरिचक्रचक्रवर्त्ति-प्रपूज्यचरणयुग-शासनसम्राट्–श्रीमद्विजयनेमिसूरीश्वरपट्टधराणां निःस्पृहतौदार्याद्यनेकगुणगणविभूषितानामनेकविद्वच्छिष्यप्रशिष्यादिपरिवारराजितानां श्रीमज्जिनेश्वरप्ररूपितत्रिपुटिविशुद्धसद्धर्मकर्मप्रतिबोधितश्राद्धवर्याणां प्रातःस्मरणीयसद्वृत्तानां नैसर्गिकशान्तमूर्त्तिस्वरूपाणामाजन्मब्रह्मचारिणामस्मदीय-गुरुवर्यप्रगुरुभगवतां पूज्यपादानां श्रीमतां विजय-विज्ञानसूरिवर्याणां सच्चरणकरणशीलशालिसुकोमलवरदकरकमले करुणरसकदम्बकसञ्ज्ञकं ग्रन्थरत्नं सादरं समर्पयति। वीरसंवत्सरे २४६७ तमेऽब्दे सूर्यपुरस्थो भवच्चरणकमलपरागरागरञ्जितो

मुनिशुभङ्करविजयः।

प्रास्ताविकं किञ्चित् ।

दरिदृश्यन्ते चास्मिन् वसुन्धरावलये विद्यमानेऽपि विविधविशिष्टशिष्ट-भाषाविरचिते साहित्यविषयेऽनेके गीर्वाणगीर्गुम्फिता ग्रन्थाः । समस्ति च तत्रानेककविवर्यनिबद्धमाबालविदुषां हृदयद्रावकं प्रियावियोगप्रियपरलोक-प्रयाणादिविषयकं करुणरसप्रधानं गद्यपद्यात्मकं कथानकवाङ्मयम् ।

जैनाचार्यैरपि तस्मिन् विषये सम्यक्तया प्रशंसनीयः प्रयासो विहित इति विश्वविश्वविदुषां मतम् । अपि च तत्साहित्यापरिचितानां जनानां प्रतिबोधनार्थं जैनसाहित्यरत्नाकरेषु सत्स्वपि करुणरसपोषकासु—अनेकासु कृतिषु समयादिसौलभ्याभावेन गद्यपद्यात्मिकाः कतिपया कृतीः समुद्धृत्याधुना विपश्चितां प्रमोदाय प्रकाश्यन्ते । द्रष्टव्याश्च प्रस्तुतग्रन्थे ये केचित् विषया निबद्धास्तेषां विहङ्गावलोकनार्थमेतद् ग्रन्थस्य विषयानुक्रमणिका । विशेषपरिचयार्थं तु समवलोकनीया सुश्रावकेण प्राध्यापकेन श्रीयुत् रसिकदासात्मजकापडियेत्युपनामकेन-हीरालालेन विरचिता प्रस्तावना । सम्पादने चास्य ग्रन्थस्य प्रेरणा हेतुरस्मदीयगुरुवर्याणां श्रीमतां मुनियशोभद्रविजयानाम् । किञ्चास्य ग्रन्थस्य संशोधने निर्विघ्नपरिपूर्तौ च पूज्यतमानां प्रगुरुभगवतां विद्यागुरूणां प्राकृतसाहित्यवाचस्पतिसिद्धान्त-महोदधीनां प्राकृतरूपमालाप्राकृतविज्ञानपाठमालादिग्रन्थरचयितानामुपाध्यायमहोदयानां श्रीमतां कस्तूरविजयगणिवर्याणां महानुपकारः कारणम् । समुत्साहितश्च तैः प्रपूज्यवर्यैरेतद्ग्रन्थकृतौ तेन च मया तेषां महानुपकारो संस्मर्यते । अस्य ग्रन्थस्य सम्पादनकर्मणि छाद्मस्थ्येन यदि काश्चित् स्खलना जाताः स्युः तर्हि गुणज्ञाः विद्वांसः क्षाम्यन्तु इति प्रार्थयते

मुनिशुभङ्करविजयः ।

॥ विषयानुक्रमणिका ॥

विषयः	पृष्ठम्

निमित्तसूचिः

		क्रमाङ्क
उपलक्षणं	स्वजनस्य	१५
कुब्जरूपं	स्वामिनः	२२
तिरस्कारः	पत्युः	१०
त्यागः	प्रियायाः	३२
दीक्षा	भ्रातुः	१
दुःखं	प्रियस्य	१८
निश्चलत्वं	गर्भस्य	४३
प्रमादः	प्रभुदर्शनस्य	१२,३७
भ्रष्टत्वं	राज्यात्	९
,,	समृद्धेः	२०
मरणं	गुरोः	३९,४०
,,	पितुः	३१
,,	पुत्रस्य	७,८,
,,	प्रभोः	२७,३६
,,	प्रियायाः	१७,११
,,	भर्तुः	३१,३३,४२
,,	भ्रातुः	१९
,,	स्वामिपुत्राणाम्	६
,,	पुत्राणाम्	६,३४
वधः	आत्मनाम्	२९

निमित्तम्		क्रमाङ्कः
वधः	पुत्रस्य	३०
,,	भ्रातुः	२१,२३
,,	महर्षेः	४
वधप्रवृत्तिः	भ्रातुः	३
वियोगः	पत्युः	१४,२८,३२
,,	पुत्रस्य	२,२४,२९,३८
,,	प्रियायाः	११,१३,३५
,,	बन्धोः	२५,४१
,,	मुद्रिकायाः	५
व्यसनं	भर्तुः	१६
व्यावर्त्तनं	विवाहात्	२६

ग्रन्थसूचिः ।

ग्रन्थः	कर्ता	वैक्रमीयवर्षम्
१ शत्रुञ्जयमाहात्म्यम्	श्रीधनेश्वरसूरिः	४७७
२ उपमितिभवप्रपञ्चा कथा	श्रीसिद्धर्षिसूरिः	९६२
३ त्रिषष्टिशलाकापुरुषचरित्रम्	श्रीहेमचन्द्रसूरिः	[1]१२२९ पूर्वे
४ पद्मानन्दकाव्यम्	श्रीअमरचन्द्रसूरिः	विसलदेव-राज्यसमयः
५ हीरसौभाग्यम्	श्रीदेवविमलगणिः	[2]१६५२ पश्चात्
६ विजयप्रशस्तिकाव्यम्	श्रीहेमविजयगणिः	[3]१६५८ अर्वाग्
७ कल्पसूत्रसुबोधिका	उपाध्याय श्रीविनय-विजयगणिः	१६९६
८ रत्नाकरपञ्चविंशतिका	श्रीरत्नाकरसूरिः	?

---

१ श्रीहेमचंद्रसूरीणामेष स्वर्गारोहणसमयः ।

२ अस्मिन् वर्षे श्रीहीरसूरयो दिवं गतवन्तः ।

३ अस्मिन् वर्षे विजयप्रशस्तिकाव्यस्य टीका निरमायि ।

विषयनिर्देशः ।

॥ शुद्धिपत्रम् ॥

अशुद्धः	शुद्धः	पृष्ठम्	पंक्तिः
दारक·	दारकः	१७	२
०सर्वङ्गो	०सर्वाङ्गो	२४	४
त्ययानघे	त्वयानघे	२६	२
दिवाकर	दिवाकरः	२६	७
तमाकएर्य	तमाकर्ण्य	२७	३
मूधन्यो	मूर्धन्यो	२८	२०
०भोक्तृणां	०भोक्तॄणां	२९	११
शु-ा	शुचा	३२	७
भ्रा;०	भ्रातृ०	३६	८
०विरह	०विरहे	३६	१०
ग्रीप्मर्तौ	ग्रीष्मर्तौ	३७	२१
अभक्ति·	अभक्तिः	३८	६
ज्ञानं	ज्ञातं	४०	१२
०पुत्रणां	०पुत्राणां	५६	६
जलाञ्ज्लिः	जलाञ्जलिः	५८	४
०चक्रयादीनां	०चक्र्यादीनां	६१	८
निर्वतध्वं	निवर्तध्वं	६४	१६
०विघ·	०विघ्नः	७५	१९
उपहत·	उपहतः	८१	८

|| ॐ नमः श्रीसिद्धचक्राय ||

परमगुरु-विश्वविख्यातजैनाचार्य-श्रीमद्-विजयनेमिसूरीश्वर-भगवद्भ्यो नमः ||

|| करुणरसकदम्बकम् ||

संस्कृतः खंडः १ |

[१]

प्रतिपन्नमहाव्रतं बाहुबलिं दृष्ट्वा भरतस्य परिदेवनम् |

साश्रुनेत्रः कनीयांसं, प्रणनाम च तत्क्षणात् |
स्वनिन्दातत्प्रशंसाढ्यं, वचनं च जगाविति || १८ ||

ये लोभमत्सरग्रस्तास्तेषां मुख्योऽस्मि बान्धव ! |
बलिनां च कृपालूनां, धर्मिणां च त्वमेव हि || १९ ||

आदौ जितोऽस्मि युद्धेन, ततो रागादयोऽप्यमी |
व्रतास्त्रेण त्वया भ्रातस्त्वत्तो नास्ति परो बली || २० ||

ममापराधमेनं त्वं, मृषित्वा[1] ब्रूहि बान्धव ! |
दयालुः पूर्ववन्नासि, किं यन्मयि न पश्यसि ? || २१ ||

---

१ क्षान्त्वा |

त्वमेव तातपुत्रोऽसि, यस्तातपथि वर्त्तसे ।
अहं विदन्नपि पुना, रागद्वेषैः कदर्थितः ॥ २२ ॥
प्रसीदाखिलमेदिन्या, मम राज्यं गृहाण भोः ।
अहं संयमसाम्राज्यं, ग्रहीष्ये भगवंस्तव ॥ २३ ॥

—शत्रुञ्जयमाहात्म्ये स० ४, पृ० ७७

[२]

पुत्रवियोगे भरतनृपस्य पुरतो मरुदेव्या दीनं वचः ।

ईषत्प्रमार्ज्य नेत्राश्रूण्युद्गिरन्ति मनःशुचम् ।
आशीःपूर्वमुवाचेदं भरतं मरुदेव्यथ ॥ ८५ ॥
वत्स ! मत्तनयः पश्य, सर्वमेकपदे ह्यदः ।
त्यक्त्वा मां त्वामन्यसुतान्, बभूव मृगसार्थभृत् ॥ ८६ ॥
क्षुत्तृड्शीतातपम्लानिक्लान्तदेहो दिवानिशम् ।
वनाद् वनं वायुरिव, बम्भ्रमीति ममाङ्गजः ॥ ८७ ॥
चन्द्रचारु क्व तच्छत्रं, मुक्तारत्नविभूषितम् ? ।
क्व च दावानलौदग्र्यं, तपनातपमण्डलम् ? ॥ ८८ ॥
किन्नरीगीतझङ्कारसारसङ्गीतकं कुतः ? ।
कुतो वनान्तसञ्चारान्मशकानां भणत्कृतिः ? ॥ ८९ ॥
क्व तद्वारणराजेन, चलनं नगरान्तरा ? ।
क्व कर्कराश्मदुःखेषु, नगेषु भ्रमणं प्रभोः ? ॥ ९० ॥

१ पाठा० ।

अहं तु दुर्मरा पुत्रदुःखौघश्रवणादपि ।
नो म्रिये जीवितं तन्मे, धिगस्तु जननिन्दितम् ॥ ९१ ॥
आकृष्टो राज्यसौख्येन, त्वं तु भोगैकलालसः ।
मत्सूनोर्भ्रमतोऽरण्ये, वार्त्तामपि न पृच्छसि ॥ ९२ ॥

—शत्रुञ्जयमाहात्म्ये स० ३, पृ० ४१

[३]

भ्रातृवधप्रवृत्तस्य बाहुबलेः परितापः ।

चलाचलस्य राज्यस्य, कृते भ्रातृवधो हहा ।
मया प्रारभ्यते हन्त, निहन्तुं स्वभवद्वयम् ॥ ५ ॥
हत्वा गुरूनपि लघून्, वञ्चयित्वा छलेन च ।
यदुपादीयते राज्यं, तत् प्राज्यमपि माऽस्तु मे ॥ ६ ॥
आपातसुखसम्प्राप्तिभ्रमितैर्हा नराधमैः ।
यत्र तत्र प्रवर्त्त्येत, नरकागारकारणे ॥ ७ ॥
अन्यथा तद्विधं राज्यं, कथमौज्झज्जिनेश्वरः ।
अहमेव पुनस्तातपथिकोऽद्य भवामि तत् ॥ ८ ॥
चिन्तयित्वेति मनसि, मनस्वी स नृपो जगौ ।
कवोष्णैर्नेत्रसलिलैः, सिञ्चन् क्ष्मां चक्रवर्त्तिनम् ॥ ९ ॥
क्षमस्व मे दुश्चरितं ज्येष्ठबान्धव ! सम्प्रति ।
मयाऽपि त्वं राज्यकृते, खेदितोऽसि जगत्प्रभो ! ॥ १० ॥
तातपान्थीभविष्यामि, स्पृहयालुर्न सम्पदि ।
तेनैव मुष्टिनेत्युक्त्वा, मूर्द्धजानुच्चखान सः ॥ ११ ॥

—शत्रुञ्जयमाहात्म्ये स० ४, पृ० ७६–७७

[४]

महर्षिहत्यायां श्रीनिवासनृपस्य शोकः ।

समूलं स्वस्य पुण्यद्रुं, स्वयं छिन्नं विदन्निव ।
महर्षिं तं हतं वीक्ष्य, शुशोच स धराधिपः ॥ ५४ ॥
आः कृतं किमिदं नाथ !, मयाऽद्य निबिडैनसा ।
दुष्कर्मवह्निना बोधि-बीजमज्वालयतार्जितम् ॥ ५५ ॥
पुण्यावसानं व्यसनं, श्वसनं परमंहसः ।
धिग् धिग् मे जीवितव्यं च, निर्मन्तुप्राणिवैरिणम् ॥ ५६ ॥
एकस्यापि हि जीवस्य, हनने ही तदर्ज्यते ।
घोरातिघोरं नरकं, लभ्यते येन मानवैः ॥ ५७ ॥
मयाऽऽत्मव्यसनं प्रौढिं, तथाऽऽनीतं दुरात्मना ।
यथा तेनातिवृद्धेन, ऋषिहत्या ममाभवद् ॥ ५८ ॥
प्रोत्साहयन्ति धर्मज्ञा, अपि मां व्यसने रतम् ।
धिक् तान् पापं च मामापद्विघायिनमनागसाम् ॥ ५९ ॥
विद्वत्ता तत्त्ववृत्तिश्च, यातु तेषां द्वयं क्षयम् ।
यैरित्युक्तं न पापाय, पापर्द्धिः पृथिवीभुजाम् ॥ ६० ॥
अमी तृणांबुसंतृप्ता, जन्तवो गतमंतवः ।
हन्यन्ते निशितैर्बाणैर्ही ही पाप्मभिरुद्धतैः ॥ ६१ ॥
असौ मुनिर्महायोगी, पुण्यराशिरिवाङ्गवान् ।
मया हतो हताशेन, क्व यामि करवाणि किम् ? ॥ ६२ ॥

१ पापेन । २ दुःखकारिणम् । ३ अनपराधिनाम् । ४ मृग्या । ५ अनपराधिनः ।

इत्युदीर्य विषण्णात्मा, धनुर्बाणान् बभञ्जसः ।
विमृशंस्तेषु दुर्जन्मकारिपापैकमूलताम् ॥ ६३ ॥
उत्तीर्य तुरगात् तूर्णं मुनेरभ्यर्णमेत्य च ।
प्रायश्चित्तमिव स्वस्यांऽहंसः कुर्वन् ननाम तम् ॥ ६४ ॥
आदाय पाणिना पादौ, श्वसतस्तस्य सन्मुनेः ।
नम्रस्वमौलौ मुकुटे, मुकुटं नृपतिर्व्यधात् ॥ ६५ ॥
मुक्तकण्ठमविश्रामं, निजं निन्दन् कुकर्म सः ।
रुरोद रोदयन् पार्श्वस्थायिनो मृगपक्षिणः ॥ ६६ ॥
हा हा दुरात्मना देव !, मृगयाव्यसनस्पृशा ।
मयाऽदोऽकारि दुष्कर्म, ममादिश करोमि किम् ? ॥ ६७ ॥
विमले स्वकुले नाथ, ! कलङ्कः कल्पितो मया ।
पुण्यसौधे महादीप्रे, ददे कज्जलकूर्चकः ॥ ६८ ॥
दुराचारो हतस्वान्तः कुले चेत् तनयो भवेत् ।
तदा पूर्वजपुण्यद्रौ, संलग्नो दावपावकः ॥ ६९ ॥
कलङ्किनो मे भगवन् !, तैरश्चनरकातिथेः ।
भवतां भवदीयौ तच्चरणौ शरणाविमौ ॥ ७० ॥
इत्युदीर्य मुनेः पादौ, क्रियासमभिहारतः ।
ननाम बाष्पकलुषलोचनः स स्वनिन्दकः ॥ ७१ ॥

—शत्रुञ्जयमाहात्म्ये स० २, पृ० ३२

१ पापस्य ।

[५]

भरतनृपस्यानित्यताभावनागर्भितः पश्चात्तापः ।

पश्यन् प्रत्यङ्गमुद्रङ्गो, [1]विमुद्रां स निजाङ्गुलीम् ।
हिमदग्धद्रुशाखाभां, मनस्येवमचिन्तयत् ॥ ५ ॥
यथेषा कृत्रिमा शोभा, ममाङ्गुल्यां हि मुद्रया ।
तथा मन्ये शिरोमुख्यप्रदेशेष्वपि भूषणैः ॥ ६ ॥
मौलेर्मौलिमपाकरोत् श्रुतियुगात् स कुण्डले कण्टतो
[2]निष्कं हारमुरु(रः)स्थलाच्च सहसैवांसद्वयादङ्गदे ।
चक्री पाणियुगाच्च वीरवलये मुद्रावलीमङ्गुली-
वर्गाद् भारमिव प्रशान्तहृदयो वैराग्यभागित्यथ ॥ ७ ॥
फाल्गुने मासि निष्पत्रफलपुष्पमिव द्रुमम् ।
[3]व्यलङ्कारं वपुर्वीक्ष्य स मनस्येवमस्मरत् । ॥ ८ ॥
कायभित्तिरियं भूषावर्णविच्छित्तिचित्रिता ।
अनित्यताजलक्लिन्ना, पतत्यन्तरसारतः ॥ ९ ॥
अहो शरीरिणां मोहः, शरीरस्यास्य दुस्त्यजः ।
रुक्समीरचलत्पक्वपत्रस्येव पतिष्यतः ॥ १० ॥
त्वगियं देहिनां सारं, शरीरे साप्यहर्निशम् ।
लिप्तानि(पि ?) चन्दनरसैः, [4]पिच्छ(च्छि)लत्वं न मुञ्चति ॥११॥

१ मुद्रारहिताम् । २ कण्ठाभरणम् । ३ आभूषणरहितम् । ४ स्निग्धत्वम् ।

यत्कृते कुरुते लोकः पापं दुष्कर्मणेरितः ।
तद् देहं नलिनीपत्रस्थितबिन्दुचलाचलम् ॥ १२ ॥
संसारखाले दुर्गन्धे, शृङ्गाररसपिच्छले ।
जानन्तोऽपि निमज्जन्ति गर्त्ताशूकरवज्जनाः ॥ १३ ॥
षष्टिं वर्षसहस्राणि भ्रामं भ्रामं धरातले ।
कलेवरस्यास्य कृते, धिगकृत्यं मया कृतम् ॥ १४ ॥
धन्यो बाहुबलिर्वीरो, धन्या अन्येऽपि बान्धवाः ।
यदसारममी त्यक्त्वा, संसारं मुक्तिमासदन् ॥ १५ ॥
राज्यं चलाचलं प्राज्यं, यौवनं च पतापतम् ।
लक्ष्मीश्चलाचला यत्र, भवेत् तत्र स्थिरं कथम् ? ॥ १६ ॥
माता पिता कलत्राणि, बान्धवाः पुत्रसम्पदः ।
जन्तूनां भवकूपान्तः, पततां कोऽपि न क्षमः ॥ १७ ॥
तात ! त्राहि जगत्त्रातर्यया त्राताः परे सुताः ।
अथोपलम्भनैरास्तां दुष्पुत्रत्वात् स्मृतोऽस्मि न ॥ १८ ॥
नाहं न मे श्रियो देहं, गेहं नान्तःपुराणि च ।
एकोऽस्मि समतानन्दसुधाम्भसि कृतप्लुतिः ॥ १९ ॥
उपाधिरहिते शान्तेऽक्रिये निधनवर्जिते ।
परे तत्त्वे चिदानन्दे, तदेति स लयं ययौ ॥ २० ॥

—शत्रुञ्जयमाहात्म्ये स० ६, पृ० १११

[६]

सगरचक्रिणः षष्ठिसहस्रपुत्रेषु भस्मीभूतेषु सैन्यचक्र्यादीनां विलापः ।

अहो मूर्खा अमी चक्रिसूनवो राज्यदुर्मदाः ।
अस्मदुक्तं युक्तमपि, मन्वते न हि धिग् मदम् ॥ २८० ॥
चिन्तयित्वेति नागेशैरन्यैरपि समन्वितः ।
फणाटोपं महाकोपाद्, बिभ्राणः फूत्कृतिं सृजन् ॥ २८१ ॥
उत्पत्य सहसा श्वभ्रात्, तत्रेत्य [1]विषहेतिभिः ।
तानि षष्ठिसहस्राणि, युगपज्ज्वलनोऽदहत् ॥ २८२ ॥—विशेषकम्
इत्यासूत्र्य महादाहं, ज्वलनो भुजगेश्वरः ।
पुनः स्वं स्थानमापेदे, कोपो रिपुवधावधिः ॥ २८३ ॥
ततस्तु सैन्ये तुमुलस्तदाघातान्महानभूत् ।
वज्रपातादिव जनेऽन्योन्यं व्याकुलताकरः ॥ २८४ ॥
तदनाथं महत्सैन्यं, कान्दिशीकमितस्ततः ।
सर्वोपायपरिभ्रष्टमासीद् दैवविपर्ययात् ॥ २८५ ॥
क्षणे क्षणे मनस्त्वन्यच्चिन्तयत्यात्मनो हितम् ।
स्वेच्छया कुरुते दैवमन्यदेवात्मनोऽहितम् ॥ २८६ ॥
दुःखोरगविषग्रस्ताः सैनिका गतनायकाः ।
प्रमार्ज्य किञ्चिदश्रूणि, चिन्तयामासुरित्यथ ॥ २८७ ॥
पश्यतामपि सर्वेषाममी चक्रीशसूनवः ।
युगपद् यद्धता नागैस्तदास्माकं बलं वृथा ॥ २८८ ॥

---

१ विषमेव शस्त्रैः ।

भूपैर्विधीयते सेना, स्वरक्षायै समन्ततः ।
सत्यामपि ततस्तस्याममी जाता गतासवः ॥ २८९ ॥

पुरे किं दर्शयिष्यामः, स्वमुखानि गतत्रपाः ? ।
चक्रीशः पुनरस्मान् ही, नानोपायैर्हनिष्यति ॥ २९० ॥

अमीषामेव तन्मार्गं, निरुपाया भजामहे ।
सद्भृत्या भूपतेर्मार्गं, श्रयन्तीति जनस्थितिः ॥ २९१ ॥

इत्यालोच्य मिथो व्याप्य, स्थितं द्वादशयोजनीम् ।
ते काष्ठैर्वेष्टयामासुः, सैन्यमश्वरथेभयुत् ॥ २९२ ॥

यावन्मुमुर्षवो दाहैस्तेऽग्निं पाणिभिरस्पृशन् ।
अज्ञासीत् तावता शक्रोऽवधिना तदुपप्लवम् ॥ २९३ ॥

दयालुः सहसोपेत्य, विप्रवेषं विधाय च ।
मा म्रियध्वं मा म्रियध्वं, तानित्यूचे दिवस्पतिः ॥ २९४ ॥

वचसा तेन धीरेण, सर्वे तस्थुस्तथैव ते ।
शक्रविप्रः पुरो भूत्वा, जगौ तान् पुनरित्यपि ॥ २९५ ॥

एष वः सर्वसंहारः, कथमद्य विजृम्भते ।
पराभवाद् वा दुःखाद् वा, शोकाद् वेष्टकृतेऽथ किं ? ॥ २९६ ॥

श्रुत्वा तस्येति वचनमवोचंस्ते कृतादराः ।
परव्यसनदुःखिन् ! भो, शृण्वस्मद्व्यसनागतिम् ॥ २९७ ॥

अमून् सगरचक्रेशसुतानालोकयाग्रतः ।
चेष्टितेन निजेनैव, भस्मसात्कृतविग्रहान् ॥ २९८ ॥

१ गतप्राणाः । २ हस्ती । ३ उत्पातम् ।

यत् सतामपि नः स्वामिसुताः प्रापुरिमां दशाम् ।
तेनैव लज्जिता वह्निं, प्रविशामो वयं ननु ॥ २९९ ॥
इत्युक्ते स पुनः प्राह, यत् साहसमनुष्ठितम् ।
तत् स्वामिभक्त्या वा स्वामिभयाद् वा शोकतोऽपि वा ॥३००॥
अनिच्छवोऽपि यन्मृत्युमिच्छामस्तत्र चक्रिभीः ।
कैः कैरुपायैः स हि नो, हनिष्यत्यूचुरित्यमी ? ॥ ३०१ ॥
ततः शक्रो निजं रूपमाधायेदमुवाच तान् ।
अत्र वो दूषणं किञ्चित्, पश्यामि न मनागपि ॥ ३०२ ॥
तन्मा म्रियध्वं चक्रीर्षा, युष्मास्वेषोऽपनोदये ।
प्रयतन्तु प्रयाणाय, मदाहूताः पुरं प्रति ॥ ३०३ ॥
इत्याश्वास्य स तान् शक्रस्तिरोऽभूत् पश्यतोऽपि हि ।
विशोकास्ते कथञ्चिच्चायोध्यां प्रत्यचलन् शनैः ॥ ३०४ ॥
प्रयाणैर्भग्नपादैस्ते, प्राप्यायोध्यां सुराधिपम् ।
अस्मरन् स पुनर्वेगादाययौ तत्कृपापरः ॥ ३०५ ॥
पञ्चवर्षशतायुष्कं, गतासुं बालकं धरन् ।
विप्रवेषधरः शक्रो, जगाम च नृपान्तिकम् ॥ ३०६ ॥
नृपद्वारगतः प्रोच्चैरुदित्वा च कठोरगीः ।
विगर्हन् वसुधां दैवं, चक्रिणं च जगौ हरिः ॥ ३०७ ॥
सर्वसहासि वसुधे !, कठिनासि न यत्त्वकम् ।
वृषभं भरतं नाथं, नानुयातासि रे जडे ! ॥ ३०८ ॥
धिक् दिक्पाला इमे कालमपेक्ष्य पाथ हा क्षितिम् ।
यूयं हि साक्षिणः सर्वव्यापाराणां शुभाशुभे ॥ ३०९ ॥

सर्वेषु सुखकृद्भावं सृजद्दैव ! समाहितम् ।
मयि किं निष्ठुरं दुःखं, सृजसीह पराङ्मुखम् ॥ ३१० ॥

मयैव दुष्कृतं चक्रे, किन्तु चात्यन्तदारुणम् ।
वृद्धे वयसि तन्मेऽद्य फलितं सुतहानितः ॥ ३११ ॥

त्वयैनं बालकं दैव !, हरता स्मरता क्रुधम् ।
वृद्धं मां मत्कलत्रं च, मुमुर्षुं हतवानसि ॥ ३१२ ॥

पाहि चक्रिन् ! कुदैवान्मां, न्यायाद्रक्ष वसुन्धराम् ।
निर्वासय पुरात्पापं, भरतेशस्थितिं स्मरन् ॥ ३१३ ॥

सुखगृध्रा हि दिक्पाला, विचैतन्या च भूरियम् ।
सर्वदेवमयस्तत्वं, किं न पासि नरेश ! माम् ? ॥ ३१४ ॥

सर्वथाप्यजिते नाथे, व्रतभाजि जिनाधिपे ।
त्वमेव पालको लोके, [1]दोषाकर इवारवौ ॥ ३१५ ॥

तस्याकर्ण्येति वचनं, विषण्णोऽथ नृपोऽपि तम् ।
आकारयज्जनैर्दोषं, स्वस्मिन्नेव विचिन्तयन् ॥ ३१६ ॥

दर्शनाच्चक्रिणः सोऽपि, मुक्त्वा तं बालकं पुरः ।
उच्चै रुरोद [2]संसत्स्थान्, रोदयन्नपरानपि ॥ ३१७ ॥

रोदनान्ते पुनः पृष्टश्चक्रिणेति स गां जगौ ।
स्वामिन् ! ममैकपुत्रस्य, दुःखं किं कथयामि ते ॥ ३१८ ॥
अद्यैष मत्सुतो बालो, निद्राणो रजनीमुखे ।
सहसैव महाक्रूरैरदश्यत [3]सैरीसृपैः ॥ ३१९ ॥

१ चन्द्रः । २ सभास्थान् । ३ सर्पैः ।

नैष दोषो भुजङ्गानां, न चैतस्य ममापि च ।
किंत्वधर्मो जने देशे, त्वयि वा वर्त्तते ननु ॥ ३२० ॥
मन्त्रयन्त्रादिभिस्तत्त्वमुल्लाघं कुरु बालकम् ।
अन्यथा त्वयि दोषः स्यादस्माकं तु कुलक्षयः ॥ ३२१ ॥
अथ चक्रधरो वैद्यान्, मांत्रिकानप्यजूहवत् ।
गतासुं तं तु ते वीक्ष्य कृतोपाया मिथो जगुः ॥ ३२२ ॥
स्वामिन्नसावसाध्यानामौषधानां प्रतिक्रिया ।
पूर्वाऽमृतगृहाद्भस्म, यद्येत्युल्लाघ एष तत् ॥ ३२३ ॥
निशम्येति तदा भूप, आदिक्षत्तत्कृते नृपान् ।
शक्रोऽपि वैक्रिये रूपैः, पश्यतिस्म गृहाद् गृहम् ॥३२४॥
महानसाद्यत्र यत्र, भस्म ते लान्ति पूरुषाः ।
तत्र तत्रेत्यपृच्छन्वः, कुले कः किं मृतो न वा ॥३२५॥
पितृभ्रातृस्वसृबन्धुमृतिं तेभ्यो निशम्य ते ।
पुनस्तथैव तद्भस्म, मुक्त्वाऽगच्छन् परान् गृहान् ॥ ३२६ ॥
भ्रमित्वाऽलब्धभस्मान, एवं ते सकलं पुरम् ।
राज्ञः समीपमासेदुः, शक्रविप्रोऽपि दुःखितः ॥ ३२७ ॥
ततो जगाद चक्रेशो, मारिहीनाद् गृहान्मम ।
महानसोद्भवं भस्म. विप्र ! त्वं समुपानय ॥ ३२८ ॥
विप्रेण गृह्णता भस्म, चक्रिमाता यशोमती ।
पृष्टा जगौ चक्रिपितृसुमित्रमरणं गृहे ॥ ३२९ ॥
तन्मुक्त्वा स तथैवैत्य, नृपमाह पितुर्मृतिम् ।

१ रोगरहितम् ।

वैद्याश्च लब्धसमयाः प्राहुस्तमिति हर्षिताः ॥ ३३० ॥
भेषजैरपरैः सद्भिरसाध्यो भूतिवर्जितः ।
विपत्स्यते बालकोऽयं, नात्र दोषश्चिकित्सके ॥ ३३१ ॥
इति श्रुत्वा शक्रविप्रो, मुक्तकण्ठं च मायया ।
उच्चै रुरोद राजेन्द्रं, दयार्द्रहृदयं सृजन् ॥ ३३२ ॥
इतश्चक्रिबलं सर्वं, राजद्वारमुपागतम् ।
राजाथ दुःखितं विप्रं, तं जगादेति सानगीः ॥ ३३३ ॥
मा कुरुष्व शुचं विप्र, ! संसारस्थितिरीदृशी ।
जातो म्रियते जीवोऽत्र, न स्थिरं वस्तुतः क्वचित् ॥ ३३४ ॥
जगत्पूज्या वज्रकाया, योगीन्द्रा जिननायकाः ।
गता अनन्तास्तेऽप्यन्तं, का चिन्ता परदेहिनाम् ॥ ३३५ ॥
सप्तधातुनिबद्धं यत् , क्षुत्तृड्शीतातपादिभिः ।
पीड्यते तत्र देहे का, स्थिरता मूर्खकल्पिता ॥ ३३६ ॥
भ्रातृपुत्रकलत्राद्याः, सर्वेऽपि स्वार्थहेतवे ।
आयान्ति यान्त्यपि सदा, दुःखं केवलमात्मनः ॥ ३३७ ॥
यस्य स्वस्यापि देहो नो, वशो सर्वत्र लालितः ।
तस्य मातृपितृभ्रातृपुत्राद्या वशगाः कथम् ॥ ३३८ ॥
इति ब्रुवाणे पृथ्वीशे, शक्रः प्रत्यक्षरूपवान् ।
जगाद च महीनेतर्वेत्सि किं संसृतेः स्थितिम् ? ॥ ३३९ ॥
सत्यमेतादृगेवायं, संसारः सर्वदुःखदः ।
किं त्वस्मिंश्च प्रमादान्धा, विचेष्टन्ते यथा तथा ॥ ३४० ॥

१ मृत्युम् ।

कर्मणोत्पद्यते विश्वं, कर्मणा च विलीयते ।
तत्र बन्धुसुतद्रव्यलाभालाभे तु का स्पृहा ॥ ३४१ ॥
चक्रिन्निदर्शनमिदं, यथा पूर्वं मृतास्तव ।
षष्टिसहस्रास्तद्वृत्ते, सूनवोऽपि मृता ननु ॥ ३४२ ॥
ततश्च सैनिकाः संसदन्तरेत्य शुचाकुलाः ।
सोरस्ताडं चक्रिणोऽग्रे, शशंसुस्तत्कुलक्षयम् ॥ ३४३ ॥
श्रुत्वेति विह्वलस्येन्द्रश्चक्रिणो व्यजनानिलैः ।
गोशीर्षचन्दनैर्देहेऽभिषेकं कमलैर्व्यधात् ॥ ३४४ ॥
कथञ्चिल्लब्धचैतन्यश्चक्री संस्मृत्य नन्दनान् ।
शोकग्रन्थिरुद्धकण्ठो, मूर्च्छतिस्म मुहुर्मुहुः ॥ ३४५ ॥
मूर्च्छया चक्रिमरणं, विभाव्य सुरराडथ ।
तत्कण्ठाश्लिष्टबाहुस्तं, मुक्तकण्ठमरोदयत् ॥ ३४६ ॥
तयो रोदननादेन, रोदसीवासिनो जनाः ।
शोकसागरनिर्मग्ना, इवाभूवन् शुचातुराः ॥ ३४७ ॥
विलीने निबिडे ग्रन्थौ, शक्रः प्रोवाच चक्रिणम् ।
किं मुह्यसि महीनेतस्त्वमप्यज्ञ इवार्भिभिः ॥ ३४८ ॥
भवे स्वकर्मणा कश्चिदल्पायुर्जायते जनः ।
दीर्घायुश्च भवेदन्यः, का चिन्तात्र ध्रुवे क्षये ॥ ३४९ ॥
त्वमेवाबोधयः पूर्वं, मां वैराग्यवचोभरैः ।
स एव च पुनर्मोहं, किमेवं लब्धवानसि ॥ ३५० ॥

—शत्रुञ्जयमाहात्म्ये स० ८, पृ० १३८–१४० ।

---

१ शोकव्याप्ताः ।

[७]

पुत्रमरणे वासववणिजस्य विषादः ।

अत्रान्तरे प्रविष्टोऽसौ विषादस्तच्छरीरके ।
मूर्च्छया पतितश्चासौ, वासवो नष्टचेतनः ॥ २५ ॥
हा हा किमेतदित्युच्चैर्विलपन्निखिलो जनः ।
ततः समागतस्तस्य, निकटे भयविह्वलः ॥ २६ ॥
अथ वायुप्रदानाद्यैः, पुनः सञ्जातचेतनः ।
प्रलापं कर्तुमारब्धः सविषादः स वासवः ॥ २७ ॥

कथम् ?—

हा पुत्र ! तात ! वत्सातिसुकुमारशरीरक! ।
ईदृशी तव सञ्जाता, काऽवस्था मम कर्मणा ? ॥ २८ ॥

निर्गतोऽसि ममापुण्यैर्वत्स ! वारयतो मम ।
दैवेन [1]निर्घृणेनेदं, तव [2]जात ! विनिर्मितम् ॥ २९ ॥

हा हतोऽस्मि निराशोऽस्मि, मुषितोऽस्मि विलक्षणः ।
एवं व्यवस्थिते वत्स, ! त्वयि किं मम जीवति ? ॥ ३० ॥

यावच्च प्रलपत्येवं, स पुत्रस्नेहकातरः ।
तावद्विषादः सर्वेसु, प्रविष्टः स्वजनेष्वपि ॥ ३१ ॥
अथ ते तस्य माहात्म्यात्सर्वे वासवबान्धवाः ।
हाहारवपरा गाढं, प्रलापं कर्तुमुद्यताः ॥ ३२ ॥

ततश्च—

---

१ निर्दयेन । २ पुत्र ! ।

क्षणेन विगतानन्दं, दीनविह्वलमानुषम् ।
रुदन्नारीजनं मूढं, जातं वासवमन्दिरम् ॥ ३२ ॥

—उपमितौ प्र० ४, पृ० ४१५ ।

[८]

जातानन्तरपुत्रमृत्यौ रिपुकम्पननृपादेः शोकः ।

अत्रान्तरे सूतिकागृहे समुल्लसितः करुणाकोलाहलोन्मिश्रः पूत्काररावः, प्रधावन्ति स्म महाहाहारवं कुर्वणा नरपतेरभिमुखं दासचेट्यः, प्रशान्तमानन्दगुन्दलं, किमेतदिति पुनः पुनः पृच्छन् कातरीभूतो राजा ।

ताभिरभिहितं—"त्रायस्व देव ! त्रायस्व, कुमारो भग्नलोचनो जातः कण्ठगतप्राणैस्ततो धावत धावत, ततो वज्राहत इव सञ्जातो राजा, तथापि सत्त्वमवलम्ब्य सपरिकरो गतः सूतिकागृहे, दृष्टः स्वप्रभोद्भासितभवनभित्तिभागः संपूर्णलक्षणधरः किञ्चिच्छेषजीवितव्यो दारकः, समाहूतं वैद्यमण्डलं, पृष्टो वैद्याधिपतिः—किमेतदिति ।

स प्राह—"देव ! समापतितोऽस्य कुमारस्य सद्योघाती बलवानातङ्कः, स च प्रचंडपवन इव प्रदीपमेनमुपसंहरति (तुं) लग्नः पश्यतामेवास्माकं मन्दभाग्यानां" ।

नृपतिराह—"भो भो लोकाः ! शीघ्रमुपक्रमध्वं यथाशक्त्या, कुमारं यो जीवयति तस्मै राज्यं प्रयच्छामि, स्वयं च पदातिभावं प्रतिपद्येऽहं" तदाकर्ण्य सर्वादरेण लोकैः प्रयुक्तानि भैषजानि, वाहिता मन्त्राः, निबद्धानि कण्डकानि, लिखिता रक्षाः, कृतानि भूतिकर्माणि, नियोजिता

विद्या, वर्तितानि मण्डलानि, संस्मृता देवता, विन्यासितानि तन्त्राणि, तथा कुर्वतामपि च गतः पञ्चत्वमसौ दारकः, अत्रांतरे कामरूपितया शोकमतिमोहाभ्यां सपरिकरयोर्मतिकलितारिपुकम्पनयोः कृतः शरीरानुप्रवेशः।

ततश्च—

हा हताऽस्मि निराशाऽस्मि, मुषिताऽस्मीति भाषिणी।
त्रायस्व देव! देवेति, वदन्ती नष्टचेतना ॥ १ ॥
क्षणान्निपतिता भूमौ, मृतं वीक्ष्य कुमारकम्।
सा देवी वज्रसङ्घाततताडिनेवातिविह्वला ॥ २ ॥
हा पुत्र! जात! जातेति, ब्रुवाणो मूर्च्छया यथा।
राजापि पतितो भूमौ, मुक्तः प्राणैस्तथैव सः ॥ ३ ॥
ततो हाहारवो घोरो, महाक्रन्दश्च भैरवः।
जनोरस्ताडशब्दश्च, क्षणेन समजायत ॥ ४ ॥
अथ मुक्तविलोलकेशकं, दलितविभूषणभग्नशंखकम्।
रिपुकम्पनयोषितां शतैर्बृहदाक्रन्दनकं प्रवर्तितम् ॥ ५ ॥
लालाविलवक्त्रकोटरं, लुठितं भूमितले सुदीनकम्।
उलुञ्चितकेशपाशकं, बृहदाराटिविमोचतत्परम् ॥ ६ ॥
हाहा हाहेति सर्वतः, करुणध्वानपरायणं जनम्।
अथ वीक्ष्य स विस्मितेक्षणो, वुद्धेः सूनुरुवाच मातुलम् ॥ ७ ॥

—उपमितौ प्र० ४, पृ० ४०२—४०३।

---

१ विकीर्णकेशकं। २ भालस्यास्थि।

[९]

राज्यभ्रष्टे धनवाहननृपस्य पश्चात्तापः ।

हृष्टाः कुस्वामिनाशेन, तुष्टाः सुस्वामिनो गुणैः ।
ते पौरसैनिका लोकास्ततः किं किं न कुर्वते ॥ ८५३ ॥
अहं तु चारके तत्र, पुरीषमलपिच्छिले ।
मूत्रान्त्रक्लेदजाम्बालदुर्गन्धे गर्भसन्निभे ॥ ८५४ ॥
क्षुधा क्षामोदरो बद्धः, परिभूतो विगर्हितः ।
स्मृतदुश्चेष्टितैः क्रुद्धैर्बालकैरपि ताडितः ॥ ८५५ ॥
अनेकयातनास्थाने, स्ववर्गेणावधीरितः ।
प्राप्तः शारीरसन्तापं, नरकेष्विव नारकः ॥ ८५६ ॥
महामोहवशीभूते, राज्यभ्रष्टे तथा मयि ।
यः सञ्जातो मनस्तापः, स व्याख्यातुं न पार्यते ॥ ८५७ ॥

तथाहि—

ममेदं विपुलं राज्यं, मामकीना विभूतयः ।
अधुनाऽन्ये प्रभोक्तार इति शोकेन पीडितः ॥ ८५८ ॥
सुखलालितदेहोऽहमधुना त्वीदृशी गतिः ।
सर्वस्य परिभूतोऽहमित्यरत्या कदर्थितः ॥ ८५९ ॥
लुम्पन्ति मामकमिदं, रत्नस्वर्णादिकं जनाः ।
एते हा हा हतोऽस्मीति, बाधितो धनमूर्च्छया ॥ ८६० ॥

१ अप्रीत्या ।

तदेवं नरकाकारे, चारके दुःखपूरितः ।
तत्राहं संस्थितो भद्रे !, सुचिरं पापकर्मणा ॥ ८६१ ॥
परिवारसमेतस्य, महामोहस्य दोषतः ।
तथाप्यहं न निर्विण्णः, संसाराच्चारुलोचने ! ॥ ८६२ ॥
क्रोधान्धस्तेषु लोकेषु, चित्तकल्लोलदूषितः ।
रौद्रध्यानानुगो नित्यं, भूरिकालमवस्थितः ॥ ८६३ ॥

—उपमितौ प्र० ७, पृ० ६७६ ।

[१०]

भर्त्रा तिरस्कृताया नरसुन्दर्या विलापः ।

ततः सा वराकी नरसुन्दरी [1]विगलितविद्येवाम्बरचारिणी, परिभ्रष्टसमाधिसामर्थ्येव योगिनी, तप्तस्थलनिक्षिप्तेव [2]शफरिका, अवाप्तनष्टरत्नविधानेव मूषिका, सर्वथा त्रुटिताशापाशबन्धना निपतिता महाशोकभरसागरे, चिन्तयितुं प्रवृत्ता—" किमिदानीं सर्वथा प्रियतमतिरस्कृताया मम जीवितेनेति, " ततो निर्गत्य भवनात् क्वचिद्गन्तुमारब्धा, ततः किमियं करोतीति विचिन्त्य सहित एव [3]शैलराजेनालक्षितपादपातं लग्नोऽहं तदनुमार्गेण, इतश्च—

लोकयन्निव निर्विण्णो, मदीयं दुष्टचेष्टितम् ।
अत्रान्तरे गतोऽन्यत्र, तदा क्षेत्रे दिवाकरः ॥ १ ॥

ततः समुल्लसितमन्धकारं संजाता विरलजनसञ्चारा राजमार्गा, ततो गता सैकत्र शून्यगृहे नरसुन्दरी, इतश्चोद्गन्तुं प्रवृत्तः शशधरः, ततो मन्दमन्दप्रकाशे

१ भ्रष्टविद्येव विद्याधरी । २ मत्स्यी । ३ मानाभिधनृपेण ।

तामेव निरीक्षमाणः प्राप्तोऽहमपि तद्द्वारदेशे, स्थितो गोपायितेनात्मना, ततो नरसुन्दर्या विलोकितं दिक्चक्रवालं, इष्टकास्थलमारुह्योत्तरीयेण बद्धो मध्यवलये पाशकः, निर्मिता तत्र [1]शिरोधरा, ततोऽभिहितमनया—"भो भो लोकपालाः ! शृणुत यूयं, अथवा प्रत्यक्षमेवेदं दिव्यज्ञानिनां तत्रभवतां यदुत—लब्धप्रसरतया नाऽथवादेन कलोपन्यासं कारितो मयाऽऽर्यपुत्रो न परिभवबुद्धया, तस्य तु तदेव मानपर्वतारोहकारणं सम्पन्नं, एवं च सर्वथा निराकृताऽहं तेन मन्दभाग्या." अत्रान्तरे मया चिन्तितं "नास्यास्तपस्विन्या ममोपरि परिभवबुद्धिः, किं तर्हि ?, प्रणयमात्रमेवात्रापराध्यति, ततो न सुन्दरमनुष्ठितं मया, अधुनाऽपि वारयाम्येनामितोऽध्यवसायादिति" विचिन्त्य पाशकच्छेदार्थं यावच्चलामि तावदभिहितं नरसुन्दर्या यदुत-"तत्प्रतीच्छत भगवन्तो ! लोकपालाः ! साम्प्रतं मदीयप्राणान्, मा च मम जन्मान्तरेष्वपि पुनरेवंविधव्यतिकरो भूयादिति," ततः शैलराजेनाभिहितं—"कुमार ! पश्य जन्मान्तरेऽपि त्वदीयसम्बन्धमेषा नाभिलषति, "मया चिंतितं—"सत्यमिदं, तथाहि—इयं प्रस्तुतव्यतिकरनिषेधमाशास्ते, मदीयव्यतिकरश्चात्र प्रस्तुतः, तन्म्रियतां, किमनया मम पापया !" ततो लब्धप्रसरेण दत्तो मम हृदये शैलराजेन स्वविलेपनहस्तकः, स्थितोऽहं तस्य माहात्म्येन तां प्रति काष्ठवन्निष्ठितार्थः, ततः प्रवाहितो नरसुन्दर्यात्मा, पूरितः पाशकः, लम्बितुं प्रवृत्ता, निर्गते नयने, निरुद्धः श्वासमार्गः, वक्रीकृता ग्रीवा, आकृष्टं धमनीजालं, शिथिलितान्यंगानि, [2]समसमायितं [3]श्रोतोभिः, निर्वादितं वक्त्रकुहरं, विमुक्ता च सा प्राणैर्वराकी, इतश्च भवनान्निर्गच्छन्ती दृष्टाऽम्बया नरसुन्दरी अहं तु

१ कण्ठः। २ शून्यायितम्। ३ इन्द्रियैः।

तदनुयायी, चिन्तितमनया–" नूनं भग्नप्रणयेयं रुष्टा क्वचिद् गच्छति मे वधूः, अयं पुनरस्या एव प्रसादनार्थं पृष्ठतो लग्नो मम पुत्रकः, " ततो दूरं गतयोरावयोरनुमार्गेणागच्छन्ती समागताऽम्बापि तत्र शून्यगृहे, दृष्टा तथा लम्बमाना नरसुन्दरी, चिंतितमम्बया–हा हा हताऽस्मि, नूनं मत्पुत्रकस्यापीयं वार्ता, कथमन्यथाऽस्यामेवं व्यवस्थितायां स तूष्णीमासीत ?, मया तु शैलराजीयावलेपनदोषेणैव अवस्तुनिर्बन्धपरेयमिति कृता तदवधीरणा, ततः शोकभरान्धया मम पश्यत एव तथैव व्यापादितोऽम्बयाऽप्यात्मा, ततः साध्वससन्तापेनेव शुष्कं मनाङ् मे स्तब्धचित्ताभिधानं तत्तदा हृदयावलेपनं, गृहीतोऽहं पश्चात्तापेनाक्रान्तः शोकभरेण,–

ततः स्वाभाविकस्नेहविह्वलीभूतमानसः ।
क्षणं विधातुमारब्धः, प्रलापमतिदारुणम् ।। १ ।।

—उपमितौ प्र० ३, पृ० ३१९–३२१ ।

---

१ तिरस्कारः ।

[११]

प्रियायाश्चयवने ललिताङ्गदेवस्य विलापः ।

दलं वृक्षादिव दिवस्ततोऽच्योष्ट स्वयंप्रभा ।
आयुःकर्मणि हि क्षीणे, नेन्द्रोऽपि स्थातुमीश्वरः ॥ ५१५ ॥
आक्रान्तः पर्वतेनेव, [1]कुलिशेनेव ताडितः ।
पियाच्यवनदुःखेन, ललिताङ्गोऽथ मूर्च्छितः ॥ ५१६ ॥
लब्धसंज्ञः क्षणेनाऽथ, विललाप मुहुर्मुहुः ।
विमानं श्रीप्रभमपि, प्रतिशब्दैर्विलापयन् ॥ ५१७ ॥
प्राप नोपवने प्रीतिं, न वाप्यामपि [2]निर्ववौ ।
[3]क्रीडाशैलेऽपि न स्वस्थान्नानन्दन्नन्दनेऽपि सः ॥ ५१८ ॥
हा प्रिये ! हा प्रिये ! क्वाऽसि, क्वाऽसीति विलपन्नसौ ।
स्वयम्प्रभामयं विश्वं, पश्यन् बभ्राम सर्वतः ॥ ५१९ ॥

—त्रिषष्टि प० १, स० १, पृ० १९

१ वज्रेणेव । २ शान्तिं जगाम । ३ क्रीडापर्वते ।

[१२]

प्रभुदर्शनविलम्बे बाहुबलेः शोकः ।

हस्तविन्यस्तचिबुको, बाष्पायितविलोचनः ।
अथेदं चिन्तयामास, ताम्यंस्तक्षशिलापतिः ॥ ३७० ॥
स्वामिनं पूजयिष्यामि, समं परिजनैरिति ।
मनोरथो मुधा मेऽभूद्, हृदि बीजमिवोषरे ॥ ३७१ ॥
चिरं कृतविलम्बस्य, लोकानुग्रहकाम्यया ।
धिगियं मम सा जज्ञे, स्वार्थभ्रंशेन मूर्खता ॥ ३७२ ॥
धिगियं वैरिणी रात्रिर्धिगियं च मतिर्मम ।
अन्तरायकरी स्वामिपादपद्मावलोकने ॥ ३७३ ॥
विभातमप्यविभातं भानुमानप्यभानुमान् ।
दृशावप्यदृशावेव, पश्यामि स्वामिनं न यत् ॥ ३७४ ॥
अत्रप्रतिमया तस्थौ, रात्रिं त्रिभुवनेश्वरः ।
अयं पुनर्बाहुबलिः, सौधे शेते स्म [3]निस्त्रपः ॥ ३७५ ॥

—त्रिषष्टि० प० १, स० ३, पृ० ८०

---

१ बाहुबलिनृपः । २ क्षारभूमौ । ३ लज्जारहितः ।

[१३]

वनमालावियोगे वीरकुविन्दस्य प्रलपनम् ।

इतो वीरकुविन्दोऽपि वियुक्तो वनमालया ।
भूताविष्ट इवोन्मत्त इव मत्त इवाभ्रमत् ॥ ६२ ॥

धूलीधूसरसर्वाङ्गो जीर्णकर्पटखण्डवत्[१] ।
विसंस्थुलशिरःकेशो दीर्घरोमनखावलिः ॥ ६३ ॥

उत्तालतुमुलैः पौरदारकैः परिवारितः ।
वनमाले ! वनमाले ! क्वासि मे देहि दर्शनम् ? ॥ ६४ ॥

निरागसं किमत्याक्षीरेकमेकपदेऽपि माम् ? ।
अथवा नर्मणा[२]त्याक्षीः सुचिरं युज्यते न तत् ॥ ६५ ॥

रूपलुब्धेन वा रक्षोयक्षविद्याधरादिना ।
केनाप्यपहृतासि त्वं धिग्धिङ्मां गतभाग्यकम् ? ॥ ६६ ॥

इत्यादि प्रलपन् पुर्यां चत्वरेषु त्रिकेषु च ।
वराको रङ्कवत् कालमतिवाहयति स्म सः ॥ ६७ ॥

पंचभिः कुलकम् ॥ ५ ॥

—त्रिषष्टि० प० ६, स० ७, पृ० २१३ ।

---

१ जीर्णवस्त्रखण्डवत् । २ हास्येन ।

[१४]

गृहान्निर्वासिताया अञ्जनाया विलापः ।

पर्यटन्ती तु सा प्राप कामप्येकां महाटवीम् ।
गिरिकुञ्जे तरोर्मूले निषद्य विललाप च ।। १५२ ।।

अहो मे मन्दभाग्याया गुरूणामविचारतः ।
अग्रे दण्डोऽभवत्पश्चादपराधविवेचनम् ।। १५३ ।।

साधु केतुमति ! कुलकलङ्को रक्षितस्त्वया ।
त्वयापि सम्बन्धिभयात्तात ! साधु विचारितम् ।। १५४ ।।

दुःखितानां हि नारीणां माताश्वासनकारणम् ।
पतिच्छन्दजुषा[1] मातस्त्वयाप्यहमुपेक्षिता ।। १५५ ।।

भ्रातर्दोषोऽपि नास्त्येव ताते जीवति ते ननु ।
नाथ ! त्वयि च दूरस्थे जज्ञे सर्वोऽप्यरिर्मम ।। १५६ ।।

सर्वथा स्त्री विना नाथं मैकाहमपि[2] जीवतु ।
यथाहमेका जीवामि मन्दभाग्यशिरोमणिः ।। १५७ ।।

—त्रिषष्टि० प० ७, स० ३, पृ० ३४ ।

---

१ पतीच्छानुवर्तिनी । २ एकदिवसमपि ।

[१५]

दवदन्तीति उपलक्षणे चन्द्रयशाया वचनानि ।

किमात्मगोपनं कृत्वा वञ्चितास्मि त्वयानघे ! ।
यद्येवं दुर्दशा दैवात् का ह्री मातृकुले निजे ? ॥ ८३५ ॥
हा वत्से ! किं त्वया मुक्तो नलो मुक्तासि तेन वा ? ।
नूनं मुक्तासि तेन त्वं त्वं सती तं न मुञ्चसि ॥ ८३६ ॥
त्वयापि यदि हीयेत दुर्दशापतितः पतिः ।
उदयेत तदा नूनं पश्चिमायां दिवाकरः ॥ ८३७ ॥
नलात्याक्षीः कथमिमां ? मत्पार्श्वे नामुचः कथम् ? ।
किं ते कुलोचितमिदं दयितां त्यजतः सतीम् ? ॥ ८३८ ॥
दुःखं गृह्णामि ते वत्से ! [१]क्रियाः समवतारणम् ।
[२]आगः सहस्व मे यत्त्वं न मयास्युपलक्षिता ॥ ८३९ ॥
तमोऽहिगरुडः कृष्णनिशायामपि भास्करः ।
क्व वा स तिलको बाले ! तवालिकसहोद्भवः ? ॥ ८४० ॥

—त्रिषष्टि प० ८, स० ३, पृ० ६०।

---

१ निर्वापय । २ दुःखस्योत्तारणं क्रियाः विधेयाः । ३ अपराधम् ।
४ भालम् ।

[१६]

द्यूतममुञ्चति नले दवदन्त्याः खेदः ।

नलानुरक्तो लोकश्च हा हा कर्तुं प्रचक्रमे ।
हाहाकारं तमाकर्ण्य तत्रागाद्दवदन्त्यपि ॥ ४४४ ॥
उवाच वचनं नाथ ! नाथामि त्वां प्रसीद मे ।
मुंच द्यूतं द्रोहकौ ते वैरिणाविव देवनौ ॥ ४४५ ॥
वेश्यागमनवद्द्यूतं क्रीडामात्रं मनीषिण ।
सेवन्ते नाथ ! न त्वेवमत्यधङ्करणमात्मनः ॥ ४४६ ॥
वरं राज्यं स्वयं देहि कूबरायानुजन्मने ।
श्रीरात्तास्मात्प्रसह्येति प्रवादं मात्मनः कृथाः ॥ ४४७ ॥
उपार्जिता युद्धशतैर्द्यूतोत्तीर्णा मही तव ।
दुनोति देवात्यन्तं मामश्रोतोगतसित्रश्रुवत् ॥ ४४८ ॥
तद्वाचं न हि शुश्राव ददर्शापि न तां नलः ।
अध्यारूढो मदावस्थां दशमीमिव वारणः ॥ ४४९ ॥
पत्या भृशमवज्ञाता रुदन्ती दवदन्त्यथ ।
कुलामात्यादिकानूचे नलं द्यूतान्निषेधत ॥ ४५० ॥

—त्रिषष्टि० प० ८, स० ३, पृ० ५५ ।

---

१ पार्थयामि । २ क्रीडनपाशकौ । ३ द्यूतेनोत्तीर्णा गतेत्यर्थः ।
४ गजस्य मदावस्थाविशेषः ।

[१७]

सुतारायां पञ्चत्वमुपागतायां श्रीविजयनृपस्य विलापः।

परासुरिवनिःसंज्ञः परासुमवलोक्य ताम्।
पपात मूर्च्छितः पृथ्व्यां स पृथ्वीपतिपुंगवः॥ २५८॥
पुनर्व्यावृत्तचैतन्योऽभिषिक्तश्चंदनद्रवैः।
मूर्धाभिषिक्तमूर्धन्यो विललापैवमुच्चकैः॥ २५९॥
ह हा दैवेन मुषितो नयता त्वां मनोरमे!।
त्वद्रूपैरेव हि प्राणैः प्राणितव्यं ममाभवत्॥ २६०॥
त्वां विनैष जनः कान्ते! शोकसंभारभारतः।
जीर्णं गृहमिवाधारस्तम्भहीनं पतिष्यति॥ २६१॥
मद्वल्लभां लोभयता वल्लभादेशतत्परः।
काञ्चनेन कुरङ्गेण वञ्चितोऽस्मि ह हा जडः॥ २६२॥
प्रत्यक्षं मे प्रियां दष्टुं तक्षकोऽपि हि न क्षमः।
कुर्कुटाहिस्तु दूरेऽस्तु दैवं हि बलवत् परम्॥ २६३॥
ततोऽनुगन्तुं दयितां त्यजन् प्राणान् हुताशने।
ऊनं प्रपूरयाम्यद्य दुर्दैवस्याभिसर्पत॥ २६४॥
तया सह महीनाथः सद्यो विरचितां चिताम्।
अलंचक्रे स्वयं धीरो रतिमन्दिरतल्पवत्॥ २६५॥

— त्रिषष्टि० प० ५, स० १, पृ० १०९।

१ गतप्राणाम्। २ मूर्धाभिषिक्तानां राज्ञां मूर्धन्यो मुकुटसमानः।

[१८]

पवनञ्जयस्याग्निप्रवेशश्रवणे अञ्जनाया विलापः ।

प्रतिसूर्याञ्जनयोस्तेऽञ्जनाविरहदुःखतः ।
पवनस्याग्निप्रवेशप्रतिज्ञामाचचक्षिरे ॥ २५८ ॥
दुःश्रवं तद्वचः श्रुत्वा पीत्वा विषमिवाञ्जना ।
हा हतास्मीति जल्पन्ती पपात भुवि मूर्छिता ॥ २५९ ॥
आसिक्ता चन्दनांभोभिस्तालवृन्तैश्च वीजिता ।
लब्धसञ्ज्ञा समुत्थाय सा रुरोदेति दीनगीः ॥ २६० ॥
पतिव्रताः पतिशोकात् प्रविशन्ति हुताशने ।
तासां विना हि भर्तारं दुःखाय खलु जीवितम् ॥ २६१ ॥
नारीसहस्रभोक्तृणां भर्तृणां श्रीमतां पुनः ।
क्षणिकः प्रेयसीशोकस्तत्कृतोऽग्निप्रवेशनम् ॥ २६२ ॥
विपरीतमिदं जज्ञे त्वयि वह्निप्रवेशनि ।
विरहेऽपि मयि पुनर्हा जीवन्त्यामियच्चिरम् ॥ २६३ ॥
महासत्त्वस्य तस्याल्पसत्त्वायाश्च ममान्तरम् ।
उपलब्धमिदं नीलकाचयोरिव[1] सम्प्रति ॥ २६४ ॥
न मे श्वशुरयोर्दोषो दोषः पित्रोर्न चाप्ययम् ।
ममैव मंदभाग्यायाः कर्मदोषोऽयमीदृशः ॥ २६५ ॥

—त्रिषष्टि० प० ७, स० ३, पृ० ३८ ।

१ नीलमणेः काचस्य च ।

[१९]

परासुं लक्ष्मणं दृष्ट्वा रामादीनां विलापः ।

परासुं लक्ष्मणं प्रेक्ष्य तत्र चान्तःपुरस्त्रियः ।
चक्रन्दुः सपरीवारा विलुलत्कुन्तलालिकाः ॥ १२७ ॥

तच्चाक्रन्दितमाकर्ण्य तत्र रामः समाययौ ।
उवाच च किमारब्धमविज्ञायाप्यमङ्गलम् ॥ १२८ ॥

जीवन्नेवैष तिष्ठामि जीवत्येष च मेऽनुजः ।
कोऽप्ययमुं बाधते व्याधिर्भेषजं तत्प्रतिक्रिया ॥ १२९ ॥

इत्युक्त्वाजुहवद्रामो वैद्याञ्ज्योतिषिकानपि ।
प्रयोगं मंत्रतन्त्राणां कारयामास चासकृत् ॥ १३० ॥

वैफल्ये मन्त्रतन्त्राणां मूर्च्छां प्राप रघूद्वहः ।
कथञ्चिल्लब्धसञ्ज्ञः सन् विललापोच्चकैःस्वरम् ॥ १३१ ॥

ते बिभीषणसुग्रीवशत्रुघ्नाद्या उदश्रवः ।
विमुक्तकण्ठं रुरुदुर्हताः स्म इति भाषिणः ॥ १३२ ॥

कौशल्याद्या मातरश्च स्नुषाभिः सह साश्रवः ।
भूयो भूयोऽपि मूर्च्छन्त्यश्चक्रन्दुः करुणस्वरम् ॥ १३३ ॥

प्रतिमार्गं प्रतिगृहं प्रत्यट्टं क्रन्दनात्तदा ।
शोकाद्वैतमभूत् सर्वं रसान्तरमलिम्लुचम् ॥ १३४ ॥

—त्रिषष्टि० प० ७, स० १०, पृ० १२७ ।

---

१ मृतम् । २ विलुलन् कुंतलालिः केशपंक्तिर्यासां ताः ।

[२०]

च्यवनकाले सुराणां विलापः ।

हा प्रिया ! हा विमानानि !, हा वाप्यो ! हा सुरद्रुमाः ! ।
क द्रष्टव्याः पुनर्यूयं, हतदैववियोजिताः ? ॥ १६६ ॥

अहो स्मितं सुधावृष्टिरहो बिम्बाधरः सुधा ।
अहो वाणी सुधावर्षिण्यहो कान्ता सुधामयी ॥ १६७ ॥

हा रत्नघटितास्तम्भा, हा श्रीमन्मणिकुट्टिमाः ।
हा वेदिका रत्नमय्यः, कस्य यास्यथ संश्रयम् ? ॥ १६८ ॥

हा रत्नसोपानचिताः, कमलोत्पलमालिनः ।
भविष्यन्त्युपभोगाय, कस्येनाः पूर्णवापयः ? ॥ १६९ ॥

हे पारिजात ! मन्दार ! सैन्तान ! हरिचन्दन ! ।
कल्पद्रुम ! विमोक्तव्यः, किं भवद्भिरयं जनः ? ॥ १७० ॥

हहा स्त्रीगर्भनरके, वस्तव्यमवशस्य मे ।
हहाशुचिरसास्वादः कर्तव्यो मयका मुहुः ॥ १७१ ॥

ह हा हा जैठराङ्गारशकटीपाकसम्भवम् ।
मया दुःखं विषोढव्यं, बद्धेन निजकर्मणा ॥ १७२ ॥

रतेरिव निधानानि, क तास्ताः सुरयोषितः ? ।
क्काशुचिस्पन्दबीभत्सा, भोक्तव्या नरयोषितः ? ॥ १७३ ॥

---

१ भूमयः । २ कल्पवृक्षाभिधानम् । ३ जठरमेव अङ्गारशकटी तस्याः पाकात्सम्भूतम् । ४ अशुचिप्रस्रवणत्वेन बीभत्साः ।

एवं स्वर्लोकवस्तूनि, स्मारं स्मारं दिवौकसः ।
विलपन्तः क्षणस्यान्तर्विध्यायन्ति प्रदीपवत् ॥ १७४ ॥

॥ नवभिः कुलकम् ॥

—त्रिषष्टि० प० ३, स० ४, पृ० ३८ ।

---

[२१]

मृगभ्रान्त्या भ्रातृवधे जराकुमारस्य विलपनम् ।

श्रुत्वेति किमयं कृष्ण इति तत्रैव सत्वरम् ।
जरत्कुमार आयासीद्दृष्ट्वा कृष्णं मुमूर्छ च ॥ १३८ ॥
कथमप्याप्तसंज्ञः सँज्जारेयः[1] करुणं रुदन् ।
पप्रच्छ कृष्णं हा भ्रातः किमेतत्किमिहागमः ? ॥ १३९ ॥
किं द्वारका पुरी दग्धा किं यदूनां क्षयोऽभवत् ? ।
सा नूनं नेमिवाक् सर्वा सत्या तेऽवस्थयानया ॥ १४० ॥
कृष्णोऽपि सर्वमाचख्यौ जारेयोऽपि रुदन् पुनः ।
इत्यूचे हा मया भ्रातुरागतस्योचितं कृतम् ॥ १४१ ॥
कनिष्ठं दुर्दशामग्नं भ्रातरं भ्रातृवत्सलम् ।
त्वां निहन्तुर्मम स्थानं क्व नाम नरकावनौ ? ॥ १४२ ॥
वनवासं तव त्राणबुद्धयाकार्षमहं किल ।
न जाने विधिना यत्ते स्थापितः पुरतोऽन्तकः ॥ १४३ ॥
हे पृथ्वि ! देहि विवरं वरमद्यैव येन ताम् ।
अनेनैव शरीरेण प्रयामि नरकावनिम् ॥ १४४ ॥

---

१ जरादेवीपुत्रः ।

अतः परमिह स्थानमधिकं नरकादपि ।
सर्वदुःखाधिके भ्रातृहत्यादुःख उपस्थिते ॥ १४५ ॥
वसुदेवस्य पुत्रोऽहं किं भ्राता तव चाभवम् ? ।
किं वाभूवं मनुष्योऽपि यः कर्माकार्षमीदृशम् ॥ १४६ ॥
सर्वज्ञवचनं श्रुत्वा तदैव न मृतोऽस्मि किम् ? ।
जनमात्रे मयि मृते किं न्यूनं स्यात्सति त्वयि ? ॥ १४७ ॥
ततो बभाषे कृष्णस्त्वं कृतं भ्रातः ! शुचा तव ।
न त्वया न मया वापि लङ्घ्यते भवितव्यता ॥ १४८ ॥

—त्रिषष्टि० प० ८, स० ११, पृ १५८ ।

---

[२२]

कुब्जरूपं नलं दृष्ट्वा द्विजस्य विषादः ।

पृच्छन् पृच्छन् ययौ कुब्जसमीपे निषसाद च ।
सर्वांगविकृताकारं तं दृष्ट्वा विषसाद सः ॥ ९५८ ॥
दध्यौ च क्व नलः क्वायं क्व मेरुः क्व च सर्षपः ? ।
उत्पन्नास्मिन्नलभ्रान्तिर्दवदन्त्या वृथैव हि ॥ ९५९ ॥
निश्चेष्ये सम्यगिति च मनसा सम्प्रधार्य सः ।
जगौ श्लोकयुगल्कं नैलापश्लोकगर्भितम् ॥ ९६० ॥
[३]निर्घृणानां निष्कृपाणां निःसत्त्वानां दुरात्मनाम् ।
धूर्वहो नल एकैव पत्नीं तत्याज यः सतीम् ॥ ९६१ ॥

---

१ विरूपाकृतिम् । २ नलापकीर्तिगर्भितम् । ३ निर्दयानाम् ।
४ अग्रसरः ।

सुप्तामेकाकिनीं मुग्धां विश्वस्तां त्यजतः सतीम् ।
उत्सेहाते कथं पादौ नैषधेरल्पमेधसः ॥ १६२ ॥

मुहुर्मुहुः पठ्यमानं तच्छ्रुत्वा दयितां स्मरन् ।
रुरोदानर्गलगलन्नयनाब्जजलो नलः ॥ १६३ ॥

किं रोदिषीति ? विप्रेण पृष्टः प्रोवाच हुण्डिकः ।
गीतं ते मञ्जु करुणरसमाकर्ण्य रोदिमि ॥ १६४ ॥

कुब्जेन पृष्टः श्लोकार्थं स विप्रोऽकथयत् कथाम् ।
आ द्यूतात्कुण्डिनपुरे वैदर्भीगमनावधि ॥ १६५ ॥

पुनराख्यदहो कुब्ज ! सूर्यपाकेन सूपकृत्[1] ।
सुसुमारेशदूतेनाख्यातस्त्वं भीमभूपतेः ॥ १६६ ॥

एवंविधचरित्रेण नलो भवति नापरः ।
भैम्येति भीममभ्यर्थ्य त्वां द्रष्टुं प्रेषितोऽस्म्यहम् ॥ १६७ ॥

अचिंतयं च त्वां दृष्ट्वा क्व कुब्जस्त्वं दुराकृतिः ? ।
क्व नलो देवतारूपः ? क्व खद्योतः क्व भास्करः ? ॥ १६८ ॥

मम चागच्छतोऽभूवञ्छकुनानि शुभानि तु ।
तानि सर्वाण्यन्यथा त्वं यन्नुर्नासि नलो यतः ॥ १६९ ॥

दवदन्तीं हृदि ध्यायन् रुदन् कुब्जोऽधिकाधिकम् ।
उपरुध्य गृहेऽनैषीत्तं विप्रमिति चावदत् ॥ १७० ॥

त्रिषष्टि० प० ८, स० ३, पृ० ७२ ।

---

१ पाककृत् ।

[२३]

बन्धुवधे बलदेवस्य परिदेवनम् ।

सुप्तोऽसौ सुखमस्तीति बुध्या तस्थौ क्षणं बलः ।
दृष्ट्वा च मक्षिकाः कृष्णाः कृष्णास्याद्रक्तमाक्षिपत् ॥ २ ॥

ततोऽज्ञासीन्मृतं बन्धुं बलः सद्योऽथ मूर्छया ।
पपात जगतीपृष्ठे कृन्तमूल इव द्रुमः ॥ ३ ॥

कथंचिल्लब्धसञ्ज्ञः सन् सिंहनादं बलोऽकरोत् ।
वित्रेसुः श्वापदास्तेन चकम्पे चाखिलं वनम् ॥ ४ ॥

इत्युवाच च येनेह सुखसुप्तो ममानुजः ।
विश्वैकवीरः पापेन निजघ्ने स्वं स शंसतु ॥ ५ ॥

स मे [1]समक्षीभवतु सत्यं हि सुभटो यदि ।
सुप्तप्रमत्त[2]भ्रूणर्षिस्त्रीषु हि प्रहरेत कः ? ॥ ६ ॥

इत्युच्चैः शब्दमाक्रोशन् रामो बभ्राम तद्वनम् ।
भूयः कृष्णमुपेयाय तमालिङ्ग्य रुरोद च ॥ ७ ॥

हा भ्रातरवनीवीर ! हा मदुत्सङ्गलालित ! ।
हा कनिष्ठगुणज्येष्ठ ! विश्वश्रेष्ठ ! क्व तिष्ठसि ? ॥ ८ ॥

विना भवन्तं न स्थातुम[3]ीशोऽस्मीति पुराऽवदः ।
वचोऽपि नाधुना दत्से क्व सा प्रीतिर्जनार्दन ! ? ॥ ९ ॥

नापराधं स्मरामि स्वं रुषितश्च निरीक्ष्यसे ।
किं वा यो मे विलम्बोऽभूत् स ते रोषस्य कारणम् ? ॥ १० ॥

---

१ प्रत्यक्षीभवतु । २ गर्भः । ३ समर्थः ।

स्थानेऽसि रुषितो भ्रातस्तथाप्युत्तिष्ठ सम्प्रति ।
गच्छत्यस्तं रविः स्वप्नकालो नैष महात्मनाम् ॥ ११ ॥
एवं च प्रलपन् रामस्तामतीयाय यामिनीम् ।
उत्तिष्ठोत्तिष्ठ हे भ्रातः ! प्रातरप्येवमब्रवीत् ॥ १२ ॥
अनुत्तिष्ठन्तमुत्थाय तमथ स्नेहमोहितः ।
रामः स्कन्धे समारोप्याभ्राम्यद्गिरिवनादिषु ॥ १३ ॥
कृष्णकायं वहन्नर्चन् पुष्पाद्यैरन्वहं बलः ।
षण्मासानतिचक्राम भ्रातृस्नेहविमोहितः ॥ १४ ॥

—त्रिषष्टि० प० ८, स० १२, पृ० १५०.।

---

[२४]

पुत्रविरहे मरुदेव्या विलापः ।

स्वामिनी **मरुदेवा**ऽपि, भरतायाऽऽशिषं ददौ ।
हृद्यमान्तीं शुचमिव, गिरमित्युज्जगार च ॥ ४०.० ॥
मां त्वां महीं प्रजां लक्ष्मीं, विहाय तृणवत् तदा ।
एकाकी गतवान् वत्सो, दुर्मरा मरुदेव्यहो ! ॥ ४०.१ ॥
सूनोश्चन्द्रातपच्छायमातपत्रं क्व मूर्द्धनि ? ।
सर्वाङ्गसन्तापकरः, क्वेदानीं तपनातपः[1] ? ४०.२ ॥
सलीलगतिभिर्यानैर्यानं हस्त्यादिभिः क्व तत् ? ।
वत्सस्य पादचारित्वं, क्वेदानीं पथिकोचितम् ? ॥ ४०.३ ॥
क्व तद् वारवधूत्क्षिप्तचारुचामरवीजनम् ? ।

---

१ सूर्यस्यातपः ।

मत्सूनोः काऽधुना दंशमशकाद्यैरुपद्रवः ? ॥ ४९४ ॥
क तद् देवसमानीतदिव्याहारोपजीवनम् ? ।
क भिक्षाभोजनं तन्याऽभोजनं वाऽपि सम्प्रति ? ॥ ४९५ ॥
रत्नसिंहासनोत्सङ्गे, महर्द्धेः क तदासनम् ? ।
मत्सूनोः [1]खड्गिन इव, क निरासनताऽधुना ? ॥ ४९६ ॥
आरक्षैरात्मरक्षैश्च, रक्षिते क पुरे स्थितिः ? ।
सूनोः क वासः सिंहाहिदुःश्वापदपदे वने ? ॥ ४९७ ॥
क तद् दिव्याङ्गनागीतं, कर्णामृतरसायनम् ? ।
सूनोः कोन्मत्त[2]फेरुण्डफेत्काराः कर्णसूचयः ॥ ४९८ ॥
अहो ! कष्टमहो ! कष्टं, यन्मे सूनुस्तपात्यये ।
पद्मखण्ड इव मृदुः, सहते [3]वारिविद्रवम् ॥ ४९९ ॥
हिमर्त्तौ हिमसम्पातसङ्क्लेशविवशां दशाम् ।
अरण्ये मालतीस्तम्ब, इव याति निरन्तरम् ॥ ५०० ॥
[4]उष्णार्त्तावुष्णकिरणकिरणैरतिदारुणैः ।
सन्तापं चाऽनुभवति, स्तम्बेरम इवाऽधिकम् ॥ ५०१ ॥
तदेवं सर्वकालेषु, वनेवासी निराश्रयः ।
पृथग्जन इवैकाकी, वत्सो मे दुःखभाजनम् ॥ ५०२ ॥
तत्तद्दुःखाकुलं वत्सं, पश्यन्त्यग्रे दृशोरिव ।
वदन्ती नित्यमप्येवं, हा ! त्वामपि दुनोम्यहम् ॥ ५०३ ॥

त्रिषष्टि० प० १, स० ३, पृ० ८४ ।

१ गण्डकारव्यपशोः । २ शृगालः । ३ जलोपद्रवम् । ४ ग्रीष्मर्तौ ।

[२५]

अजितनाथस्य विरहश्रवणे सगरनृपस्य वचनम् ।

ततः सगरमाहूय, जगाद त्रिजगद्गुरुः ।
गृह्यतां राज्यभारो नः, संसाराब्धितितीर्षताम् ॥ १४२ ॥
इत्युक्तोऽजितनाथेन, श्यामास्योऽश्रूणि पातयन् ।
एकैकबिन्दुवर्षीव, वारिदः सगरोऽब्रवीत् ॥ १४३ ॥
अभक्तिं किं मया देव !, विदधे देवपादयोः ? ।
आत्मनो मां पृथक्कर्तुमद्य येनैवमादिशः ॥ १४४ ॥
अभक्तिर्वास्तु विहिता, नाप्रसादाय सापि हि ।
पूज्यैरभक्तोऽपि शिशुः, शिष्यते न तु हीयते ॥ १४५ ॥
किं नामाभ्रंलिहेनापि, छायाहीनेन शाखिना ? ।
किंवा समुन्नतेनापि, वृष्टिहीनेन वार्मुचा ? ॥ १४६ ॥
किं वा निर्झरहीनेन, तुङ्गेनापि महीभृता ? ।
किं वा लावण्यहीनेन, सुरूपेणापि वर्ष्मणा ? ॥ १४७ ॥
किं वा गन्धविहीनेन, पुष्पेणापि विकासिना ? ।
अनेन त्वद्विहीनेन, राज्येनापि हि किं मम ? ॥ १४८ ॥
॥ त्रिभिर्विशेषकम् ॥

निर्ममस्य निरीहस्य, मुमुक्षोरपि ते सतः ।
प्रभो ! पादौ न मोक्ष्यामि, का राज्यादानसंकथा ? ॥ १४९ ॥

१ मेघेन । २ शरीरेण ।

राज्यं पुत्राः कलत्राणि, मित्राण्यथ परिच्छदः ।
तृणवत्सुत्यजं सर्वं, त्वत्पादौ दुस्त्यजौ तु मे ॥ १५० ॥
राजीभवति नाथाहं, युवराज्यभवं यथा ।
त्वयि व्रतधरे शिष्यीभविष्याम्यधुना तथा ॥ १५१ ॥
गुरुपादाम्बुजोपास्तितत्परस्य दिवानिशम् ।
[1]शैक्षस्य भैक्षमपि हि, साम्राज्यादतिरिच्यते ॥ १५२ ॥
भवं तरिष्याम्यज्ञोऽपि, भवत्पादावलंब्यहम् ।
गोपुच्छलग्नो हि तरेन्नदीं गोपालबालकः ॥ १५३ ॥
दीक्षां सह त्वयादास्ये, विहरिष्ये सह त्वया ।
दुःसहांश्च सहिष्येऽहं त्वया सह परीषहान् ॥ १५४ ॥
त्वया सहोपसर्गांश्च, सहिष्ये त्रिजगद्गुरो ! ।
कथंचिदपि न स्थास्याम्यहमत्र प्रसीद मे ॥ १५५ ॥

त्रिषष्टि० प० २, स० ३, पृ० ३८ ।

---

१ शिष्यस्य ।

[२६]

श्री नेमिकुमारं व्यावृत्तं दृष्ट्वा राजीमत्या विलापः ।

व्यावृत्तं नेमिनं दृष्ट्वा श्रुत्वा च व्रतकांक्षिणम् ।
राजीमत्यपतत् पृथ्व्यां वल्लीवाकृष्टपादपा ॥ २१० ॥
तां सख्यः सिषिचुर्भीताः शीतांभोभिः सुगंधिभिः ।
अवीजयन् व्यजनैश्च कदलीदलनिर्मितैः ॥ २११ ॥
अवाप्तसंज्ञा चोत्थाय कपोललुलितालका ।
अश्रुधारातिम्यमानकञ्चुका विललाप सा ॥ २१२ ॥
नासीन्मनोरथोऽप्येष यन्नेमिः स्याद्वरो मम ।
केनास्यभ्यर्थितो दैव ! यन्नेमिर्मे वरः कृतः ? ॥ २१३ ॥
विपरीतं कुतोऽकार्षीरकाण्डे दण्डपातवत् ? ।
एकस्त्वमसि मायावी त्वं च विश्वासघातकः ॥ २१४ ॥
यद्येवं प्रागपि ज्ञानं स्वमात्मप्रत्ययान्मया ।
क्वायं जगत्त्रयोत्कृष्टो वरो नेमिरहं क्व च ? ॥ २१५ ॥
आत्मनोऽननुरूपाहं ज्ञाता नेमे ! त्वया यदि ।
तत्त्प्रपद्य विवाहं मे जनितः किं मनोरथः ? ॥ २१६ ॥
जनयित्वा च किं भग्नः स्वामिन्मम मनोरथः ? ।
महतां प्रतिपन्नं हि यावज्जीवमपि स्थिरम् ॥ २१७ ॥

१ अश्रुधाराभिरार्द्रीक्रियमाणकञ्चुका ।

प्रतिपन्नाद्भवन्तोऽपि चलन्ति यदि तत्प्रभो ! ।
मर्यादा लङ्घयिष्यन्ति निश्चितं जलराशयः ॥ २१८ ॥
यद्वा तवापि नो दोषो दोषो मत्कर्मणामयम् ।
भवत्पाणिगृहीतात्वं वचसैव यदासदम् ॥ २१९ ॥
चारू मातृगृहं दिव्यमण्डपो रत्नवेदिका ।
विवाहायावयोरन्यदप्येतदभवन्मुधा ॥ २२० ॥
धवलैर्गीयते यत्तन्न सर्वं सत्यमीदृशी ।
सत्योक्तिस्त्वं हि मे भर्ता गीतोऽस्यादौ न चाभवः ॥ २२१ ॥
किं युग्मिनां विघटनमकार्षं पूर्वजन्मनि ? ।
पाणिस्पर्शसुखमपि यत्पत्युर्नाहमाप्नवम् ॥ २२२ ॥
विलपन्तीति सा जघ्ने हस्ताब्जाभ्यामुरःस्थलम् ।
हारं च त्रोटयामास स्फोटयामास कङ्कणे ॥ २२३ ॥

—त्रिषष्टि० प० ८, स० ९, पृ० १३७ ।

---

१ दम्पतीनाम् ।

[२७]

वृषभप्रभोर्निर्वाणे भरतस्य क्रन्दनम् ।

स्वामिनिर्वाणकल्याणान्निर्वाणो दुःखपावकः ।
अदृष्टसुखलेशानां, नारकाणामपि क्षणम् ॥ ४९३ ॥
महाशोकसमाक्रान्तश्चक्रवर्ती तु तत्क्षणम् ।
पपात मूर्च्छितः पृथ्व्यां, वज्राहत इवाऽचलः ॥ ४९४ ॥
महत्यप्यागते दुःखे, दुःखशैथिल्यकारणम् ।
विदांचकार रुदितं, न कश्चिदपि यत् तदा ॥ ४९५ ॥
दुःखशैथिल्यहेतुं तच्चक्रिणोऽज्ञापयत् स्वयम् ।
शक्रश्चकार रुदितं, महापूत्कारपूर्वकम् ॥ ४९६ ॥
अनु संक्रंदनं चक्रे, क्रन्दनं त्रिदशैरपि ।
समा हि समदुःखानां, चेष्टा भवति देहिनाम् ॥ ४९७ ॥
तेषां च रुदितं श्रुत्वा, संज्ञामासाद्य चक्र्यपि ।
उच्चैःस्वरेण चक्रन्द, ब्रह्माण्डं स्फोटयन्निव ॥ ४९८ ॥
रुदितेनाऽस्फुटद् राज्ञः, शोकग्रन्थिर्महानपि ।
पालीबंधो महास्रोतोरंहसेव महीयसा ॥ ४९९ ॥
सुरासुरमनुष्याणां, रुदितै रुदितैस्ततः ।
त्रैलोक्ये करुणरस, एकच्छत्र इवाऽभवत् ॥ ५०० ॥

१ महाप्रवाहवेगेन ।

ततः प्रभृति लोकेऽपि, देहिनां शोकसम्भवे ।
[1]रोदनाध्वा प्रववृते, शोकशल्यविशल्यकः ॥ ५०१ ॥
नैसर्गिकमपि त्यक्त्वा, धैर्यं भरतभूपतिः ।
दुःखितो विललापैवं, तिरश्चोऽपि हि दुःखयन् ॥ ५०२ ॥
हा तात ! हा जगद्बन्धो !, हा कृपारससागर ! ।
अज्ञानिह भवारण्ये, त्यक्तवानसि नः कथम् ? ॥ ५०३ ॥
अम्लानकेवलज्ञानप्रकाशेन विना त्वया ।
तमसीव [2]ऋते दीपं, स्थास्यामोऽत्र कथं भवे ? ॥ ५०४ ॥
छद्मस्थस्येव ते मौनं, किमेतत् परमेश्वर ! ? ।
कुरुष्व देशनां नाऽनुगृह्णासि किममुं जनम् ? ॥ ५०५ ॥
लोकाग्रमथवाऽयासीर्भगवन् ! भाषसे न यत् ।
आभाषन्तं दुःखितं मां, तेऽपि मद्बन्धवो न किम् ? ॥ ५०६ ॥
हुं ज्ञातमथवा ते हि, सदा स्वाम्यनुगामिनः ।
स्वामिनोऽननुगो नास्ति, मत्कुले मां विनाऽपरः ॥ ५०७ ॥

—त्रिषष्टि० प० १, स० ६, पृ० १६६ ।

---

१ रोदनमार्गः । २ विना ।

[२८]

अरण्ये सीतायास्त्यागे सेनानेः कारुण्यं तस्याश्च विलापः ।

गंगासागरमुत्तीर्यारण्ये सिंहनिनादके ।
गत्वा कृतान्तवदनस्तस्थौ किञ्चिद्विचिन्तयन् ॥ ३०९ ॥
साश्रु म्लानमुखं तं च प्रेक्ष्य सीताब्रवीदिति ।
कथमित्थं स्थितोऽसि त्वं सशोक इव दुर्मनाः ? ॥ ३१० ॥
कृतान्तः कथमप्यूचे दुर्वचं वच्म्यहं कथम् ? ।
दुष्करं कृतवांश्चैतत् प्रेष्यभावेन दूषितः ॥ ३११ ॥
राक्षसावाससंवासापवादाल्लोकजन्मनः ।
भीतेन देवि ! रामेण त्याजितासि वनेऽनघे॥ ३१२ ॥
अपवादे चराख्याते रामं त्वत्त्यजनोद्यतम् ।
न्यषेधील्लक्ष्मणो लोकं प्रति क्रोधारुणेक्षणः ॥ ३१३ ॥
सिद्धाज्ञया निषिद्धश्च रामेण स रुदन् ययौ ।
अहं च प्रेषितोऽमुष्मिन् कार्ये पापोऽस्मि देवि ! हा ॥ ३१४ ॥
अमुष्मिञ्छ्वापदाकीर्णे मृत्योरेकनिकेतने ।
जीविष्यसि मया त्यक्ता स्वप्रभावेण केवलम् ॥ ३१५ ॥
तच्छ्रुत्वा स्यन्दनात् सीता मूर्छिता न्यपतद्भुवि ।
मृतेति बुद्धया सेनानीः पापंमन्यो रुरोद सः ॥ ३१६ ॥
सीतापि वनवातेन कथञ्चित् प्राप चेतनाम् ।
भूयो भूयोऽप्यमूर्च्छच्च चेतनामाससाद च ॥ ३१७ ॥

महत्यामथ बेलायां सुस्थीभूयेत्युवाच सा ।
इतोऽयोध्या कियद्दूरे रामस्तिष्ठति कुत्र वा ? ॥ ३१८ ॥

सेनानीरभ्यधाद्दूरेऽयोध्या किं पृच्छ्यानया ? ।
उग्राज्ञस्य च रामस्य पर्याप्तं देवि ! वार्तया ॥ ३१९ ॥

इति श्रुत्वापि सा रामभक्ता भूयोऽप्यभाषत ।
भद्र ! मद्वाचिकमिदं शंसे रामस्य सर्वथा ॥ ३२० ॥

यदि निर्वादभीतस्त्वं परीक्षां नाकृथाः कथम् ? ।
शंकास्थाने हि सर्वोऽपि [2]दिव्यादि लभते जनः ॥ ३२१ ॥

अनुभोक्ष्ये स्वकर्माणि मन्दभाग्या वनेऽप्यहम् ।
नानुरूपं त्वकार्षीस्त्वं विवेकस्य कुलस्य च ॥ ३२२ ॥

यथा खलगिरात्याक्षीः स्वामिन्नेकपदेऽपि माम् ।
तथा मिथ्यादृशां वाचा मा धर्मं जिनभाषितम् ॥ ३२३ ॥

इत्युक्त्वा मूर्छिता भूमौ पतितोत्थाय चाभ्यधात् ।
मया विना कथं रामो जीविष्यति हतास्मि हा ? ॥ ३२४ ॥

रामाय स्वस्त्यथाशंसेराशिषं लक्ष्मणस्य च ।
शिवास्ते सन्तु पन्थानो वत्स ! गच्छोपराघवम् ॥ ३२५ ॥

—त्रिषष्टि० प० ७, स० ८, पृ० ११३ ।

---

१ मत्सन्देशम् । २ पंचदिव्यानां मध्ये किमपि दिव्यं करोति येन सत्यासत्ये परीक्ष्येते इतिभावः ।

[२९]

दयावीरश्रीनेमिनाथस्याग्रे ।

पशूनां शिवादेवीप्रमुखपरिवाराणां चाक्रन्दनम् ।

ततो **नेमिर्**दयावीरो बभाषे निजसारथिम् ।
यत्रैते प्राणिनः सन्ति स्यन्दनं नय तत्र मे ॥ १७५ ॥
तथैव सारथिश्चक्रे ददर्श भगवानपि ।
विविधान् प्राणिनः प्राणापहारचकितात्मनः ॥ १७६ ॥
ग्रीवायां रज्जुभिर्बद्धाः केऽपि केऽपि च पादयोः ।
केऽपि क्षिप्ताः पञ्जरान्तः केऽपि पाशेषु पातिताः ॥ १७७ ॥
उन्मुखा दीननयना वेपमानशरीरकाः ।
ते प्रेक्षांचक्रिरे **नेमिं** प्रीणकं दर्शनादपि ॥ १७८ ॥
पाहि पाहीति ते **नेमिं** स्वस्वभाषाभिरब्रुवन् ।
तांश्च साराथिमाज्ञाप्य **नेमिनाथो**ऽप्यमोचयत् ॥ १७९ ॥
स्वं स्वं स्थानं ततस्तेषु गतेषु प्राणिषु प्रभुः ।
रथं निवर्तयामास पुनर्निजगृहं प्रति ॥ १८० ॥
शिवा समुद्रविजयः कृष्णो रामोऽपरेऽपि हि ।
विहाय स्वस्वयानानि **नेमिनः** पुरतोऽभवन् ॥ १८१ ॥
शिवासमुद्रविजयावूचाते साश्रुलोचनौ ।
कस्मादकस्मादप्यस्माद् विनिवृत्तस्त्वमुत्सवात् ॥ १८२ ॥
नेमिरप्यब्रवीदेते प्राणिनो बन्धनैर्यथा ।
बद्धास्तथा वयमपि तिष्ठामः कर्मबन्धनैः ॥ १८३ ॥

यथैषां बन्धनान्मोक्षः कर्मबन्धात्तथात्मनः ।
कर्तुं दीक्षामुपादास्ये सौख्याद्वैतनिबन्धनाम् ॥ १८४ ॥
तन्नेमिवचनं श्रुत्वा तौ द्वावपि मुमूर्छतुः ।
रुरुदुर्यदवः सर्वेऽप्यनुद्धतविलोचनाः[1] ॥ १८५ ॥
शिवासमुद्रविजयौ समाश्वास्य जनार्दनः ।
रुदितं च प्रतिषिध्य बभाषेऽरिष्टनेमिनम् ॥ १८६ ॥
मम रामस्य तातानां सदा मान्योऽसि मानद ! ।
रूपं निरुपमं चेदं यौवनं च नवं तव ॥ १८७ ॥
किं च सापि स्नुषा राजीमती राजीवलोचना ।
तवानुरूपा तद् ब्रूहि किं ते वैराग्यकारणम् ? ॥ १८८ ॥
ये चैते पशवो दृष्टा स्त्वया तेऽपि हि मोचिताः ।
पितॄणां बान्धवानां च तत्पूरय मनोरथम् ॥ १८९ ॥
पितरौ शोकनिर्मग्नौ न ह्युपेक्षितुमर्हसि ।
तत्रापि हि कुरु भ्रातः सर्वसाधारणीं कृपाम् ॥ १९० ॥
प्रीणिताः प्राणिनो दीना यथैते भवता तथा ।
भ्रातॄन् प्रीणय रामादीनपि स्वोद्वाहदर्शनात् ॥ १९१ ॥

—त्रिषष्टि० प० ८, स० ९, पृ० १३६ ।

---

१ मन्दलोचनाः ।

[३०]

सगरचक्रिणोऽग्रे द्विजस्य कृत्रिमविलापः।

इत्यादिभिर्दुर्निमित्तैर्विद्धो हृदि शरैरिव ।
विमनाः प्राविशमहं चञ्चापुरुषवद्गृहम् ॥ ९८ ॥
मामापतन्तं सम्प्रेक्ष्य, ब्राह्मणी [1]विलुलत्कचा ।
सद्यो हा पुत्र ! हा पुत्रेत्याक्रन्दन्त्यपतद्भुवि ॥ ९९ ॥
ध्रुवं विपन्नो मे पुत्र, इति निश्चित्य चेतसा ।
अहमप्यपतं सद्यो, गतप्राण इवावनौ ॥ १०० ॥
मूर्छाविरामे भूयोऽपि, प्रलपन् करुणस्वरम् ।
अपश्यं गृहमध्येऽहं, सर्पदष्टमिमं सुतम् ॥ १०१ ॥
भोजनाद्यप्यकृत्वास्थां, यावज्जाग्रदहं निशि ।
कुलदेवतया तावदिदमादेशि मे पुनः ॥ १०२ ॥
भोः किमेवं समुद्विग्नोऽस्यमुना पुत्रमृत्युना ? ॥
[2]संपादयामि ते पुत्रं, यद्यादेशं करोषि मे ॥ १०३ ॥
देव्याः प्रमाणमादेश, इत्यवोचमहं ततः ।
पुत्रार्थे शोकविधुरैः, किं वा न प्रतिपद्यते ॥ १०४ ॥
कुलदेवतयाथोक्तं, [3]विपन्नो यत्र कोऽपि न ।
ततोऽग्निं मङ्गलगृहात्, कुतोऽप्यानय सत्वरम् ॥ १०५ ॥
ततस्तनयलोभेन, प्रत्यहं प्रतिमन्दिरम् ।
तत्पृच्छन् हस्यमानोऽहं, भ्रान्तोऽर्भक इवाभ्रमम् ॥ १०६ ॥

---

१ विकीर्णकेशाः। २ जीवयामि। ३ मृतः।

पृच्छ्यमानो जनः सर्वोऽप्याचष्टे स्म गृहे गृहे ।
संख्यातीतान् मृतान् वेश्म, नामृतं किञ्चिदप्यभूत् ॥१०७॥
तदप्राप्त्या च भग्नाशः, परासुरिव[1] नष्टधीः ।
व्यजिज्ञपमहं दीनस्तत्सर्वं कुलदेवताम् ॥ १०८ ॥
आदिशद्देवताप्येवं, न मङ्गलगृहं यदि ।
अमङ्गलं कथमहं, तव रक्षितुमीश्वरी[2]? ॥ १०९ ॥
तया च देवतावाचा, तोत्रेणेव[3] प्रवर्तितः ।
प्रतिग्रामं प्रतिपुरिं, भ्रमन्नहमिहागमम् ॥ ११० ॥
अपि धात्र्याः समस्तायास्त्राता त्वमसि विश्रुतः[4] ।
न कोऽपि प्रतिमल्लोऽपि, दोष्मदग्रेसरस्य ते ॥ १११ ॥
वैताढ्यगिरिदुर्गस्थश्रेणिद्वयगतास्तव ।
विद्याधरा अपि दधत्याज्ञां शिरसि माल्यवत् ॥ ११२ ॥
देवा अपि तवादेशं, सदा कुर्वंति भृत्यवत् ।
वांछितार्थं प्रयच्छन्ति, निधयश्च तवानिशम् ॥ ११३ ॥
ततस्त्वां शरणं प्राप्तो, दीनत्राणैकसत्रिणम्[5] ।
तदग्निं मंगलगृहात्, कुतोऽप्यानय मत्कृते ॥ ११४ ॥
विपन्नमपि मे पुत्रं, सा यथा कुलदेवता ।
प्रत्यानयति येनाग्निं, दुःखितः पुत्रमृत्युना ॥ ११५ ॥

—त्रिषष्टि० प० २, स० ६, पृ० ८९ ।

---

१ गतप्राण इव । २ समर्था । ३ वेणुदण्डेनेव । ४ प्रसिद्धः ।
५ दीनरक्षणे निश्चितदीक्षितम् ।

[३१]

पितुर्मृत्युसमये विष्णोस्तन्मातुश्चरोदनम् ।

तत्र च प्रविशन् विष्णुर्जननीद्वाःस्थयैकया ।
अग्रे भूत्वा सकरुणं व्यज्ञपीदमुदश्रिया ॥ १११ ॥

कुमार ! परित्रायस्व परित्रायस्व नन्वसौ ।
जीवत्यपि महाराजे देवीदं दुर्व्यवस्यति ॥ ११२ ॥

तदाकर्ण्य वचो विष्णुः संभ्रान्तो मातुरालयम् ।
जगाम वीक्षाञ्चक्रे च मातरं ब्रुवतीमिति ॥ ११३ ॥

पतिप्रसादादुद्भूता ये प्राज्या रत्नराशयः ।
अनन्तं काञ्चनं यच्च ये वा रजतसञ्चयाः ॥ ११४ ॥

मुक्तामया वज्रमया जात्यरत्नमयाश्च ये ।
संमिश्रा ये च नेपथ्यसमुदायाः सहस्रशः ॥ ११५ ॥

यच्चान्यत् कोशसर्वस्वं समक्षेभ्यां तदर्प्यताम् ।
महापथप्रस्थितानां पाथेयं हीदमाद्रिनम् ॥ ११६ ॥

पत्युर्विपत्तौ वैधव्यसहास्मि न मनागपि ।
अहं तदग्रे यास्यामीत्यनलः सज्ज्यतां द्रुतम् ॥ ११७ ॥

इति ब्रुवाणां जननीं जननीं दुःखसम्पदः ।
उपेत्य नत्वा च हरिर्व्याहरद्गद्गदाक्षरम् ॥ ११८ ॥

---

१ अनुचितं व्यवस्यति । २ मृत्युमार्गप्रस्थितानाम् । ३ विनाशे । ४ जनयित्रीम् ।

मातर्मातस्त्वमपि मां मन्दभाग्यं किमुज्झसि ।
अहो विरुद्धं मे दैवं देव्यैवं यत् प्रचक्रमे ॥ ११९ ॥

अस्मादेऽव्यप्युवाचैवं तज्ज्ञैः सम्यक् परीक्षितः ।
त्वत्तातस्योपस्थितोऽयं रोगः प्राणहरो हरे ! ॥ १२० ॥

नालं क्षणमपि श्रोतुं विधवेत्यक्षराण्यहम् ।
कौसुंभधारिणी यास्याम्यग्रतस्त्वत्पितुस्ततः ॥ १२१ ॥

कृतार्थं मेऽभवज्जन्म पत्या शिवमहीभुजा ।
पुत्र ! त्वया च पुत्रेण पञ्चमेनार्धचक्रिणा ॥ १२२ ॥

पत्युर्विपत्तौ यास्यन्ति मत्प्राणाः स्वयमेव हि ।
त्यक्ष्यामि तान् प्रविश्याग्नौ मा भून्मे हीनसत्त्वता ॥ १२३ ॥

तत्क्षत्रियकुलाचारमाचरन्त्या ममाधुना ।
मा स्म भूरन्तरायस्त्वं वत्स ! वात्सल्यतोऽपि हि ॥ १२४ ॥

समं 'सुदर्शनेन' त्वं पुत्र ! नंद मदाशिषा ।
पत्युरग्रे प्रयाम्येषा कृष्णवर्त्मैकवर्त्मना ॥ १२५ ॥

अन्तिमां प्रार्थनां तेऽद्य कुमारैनां करोम्यहम् ।
निषेधकं [3]विधेरस्य त्वया वाच्यं न किञ्चन ॥ १२६ ॥

एव मुक्त्वा तु सा स्वामिविपच्छ्रवणकातरा ।
परलोकपुरद्वारं प्रवेष्टुमनलं ययौ ॥ १२७ ॥

दुःखानुबन्धिभिर्दुःखैः श्लथाङ्गो [4]वीवधैरिव ।
समेऽपि प्रस्खलत्पादः पितुः पार्श्वं ययौ हरिः ॥ १२८ ॥

१ वैद्यैरित्यर्थः । २ अग्निमार्गेण । ३ मरणविधेः । ४ भारैरिव ।
५ समप्रदेशेऽपि ।

स्मरन् स्वां मातरं पश्यंस्तथा पितरमातुरम्[1] ।
[2]प्रतीकारासहो विष्णुः क्लीबमान्यपतद्भुवि ॥ १२९ ॥
राजा दाहज्वरार्तोऽपि बभाषे धैर्यमाश्रयन् ।
किमेतद्वत्स ! कातर्यं[3] स्वकुलानुचितं तव ॥ १३० ॥
इयं हि त्वद्भुजाधारा वत्स ! देवी वसुन्धरा ।
अधैर्यान्निपतन्नस्यां कथं नाम न लज्जसे ॥ १३१ ॥
त्वय्युच्चैः पुरुषसिंह इत्याख्याकारिणो मम ।
अज्ञानकारितां मा दास्त्वमेवं धैर्यमुत्सृजन् ॥ १३२ ॥
एवं शार्ङ्गिणमाश्वास्य शिवराजः शिवाशयः ।
कालधर्मं ययो सायं कः कालं यातुमीश्वरः ? ॥१३३॥
श्रुत्वा च मूर्च्छितो विष्णुः पपात धरणीतले ।
महाद्रुमो वात्ययेव[4] वातेनेव च वातकी[5] ॥ १३४ ॥
अथ सिक्तः पयस्कुम्भैर्लब्धसंज्ञो जनार्दनः ।
हा तात ! तात ! तातेति क्रन्दन्नुत्तिष्ठति स्म च ॥ १३५ ॥
न किं सन्तप्यते तेऽङ्गं गुणः कस्यौषधस्य वा ।
प्रत्यय कस्य वैद्यस्य सुखनिद्राथवाद्य किम् ॥ १३६॥
ब्रूहि तात ! प्रसादं मे कृत्वेति स्नेहमोहितः ।
प्रललाप क्षणं विष्णुर्विललाप च तत्क्षणम् । १३७ ॥

— त्रिषष्टि० प० ४, स० ५, पृ० ७३ ।

१ रोगग्रस्तम् । २ रोगापायेऽसमर्थः । ३ भीरुत्वम् । ४ वातसमूहेन झंझावातेन वा । ५ वातरोगी पुमान् ।

[३२]

दवदन्तीत्यागसमये नलस्य शोकः प्रियविरहे च दवदन्त्या विलापः ।

दवदन्त्येकवस्त्रेयमेका स्वपिति वर्त्मनि ।
अहो नलस्य शुद्धान्तमसूर्यपश्यमीदृशम् ॥ ५२९ ॥

अहो मत्कर्मदोषेण कुलीनेयं सुलोचना ।
प्रविवेश दशामेवं हताशः किं करोम्यहम् ? ॥ ५३० ॥

मयि सत्यपि पार्श्वस्थेऽप्युन्मत्तवदनाथवत् ।
भूमौ शेते वरारोहा जीवत्यद्यापि ही नलः ॥ ५३१ ॥

मयैकाकिन्यसौ मुक्ता प्रबुद्धा मुग्धलोचना ।
मोक्ष्यते जीवितेनापि स्पर्द्धयेव मया सह ॥ ५३२ ॥

भक्तां तदेनां वञ्चित्वा नान्यतो गंतुमुत्सहे ।
जीवितं मरणं वापि मम स्तादनया सह ॥ ५३३ ॥

अथवानेकदुःखानामरण्ये नरकोपमे ।
पात्रं नारकिक इव भवाम्येकोऽहमस्त्वसौ ॥ ५३४ ॥

मया तु वस्त्रे लिखितामाज्ञां कृत्वा मृगाक्ष्यसौ ।
स्वयं गत्वा कुशलिनी वत्स्यति [३]स्वजनौकसि ॥ ५३५ ॥

इति निश्चित्य तां रात्रिमतिक्रम्य च नैषधिः ।
प्रबोधसमये पत्न्यास्तिरोधात्त्वरितक्रमम् ॥ ५३६ ॥

---

१ अन्तःपुरम् । २ वरः श्रेष्ठ आरोहः शयनं यस्याः सा । ३ निजपितृगृहे ।

उन्निद्रपङ्कजामोदिमृदुप्रत्यूषमारुते ।
निशाशेषे दवदन्ती स्वप्नमेवमुदैक्षत ॥ ५३७ ॥
यदहं फलिते फुल्ले पत्रले चूतपादपे ।
आरुह्य तत्फलान्यादं शृण्वन्ती भृङ्गनिःस्वनान् ॥ ५३८ ॥
अकस्माद्वनकरिणोदमूलि च स पादपः ।
पतिताहं च मेदिन्यां ततोऽण्ड इव पक्षिणः ॥ ५३९ ॥
भैमी प्रबुद्धा तत्कालमपश्यंती नलं पुरः ।
दिशोऽवलोकयामास मृगी यूथादिव च्युता ॥ ५४० ॥
अचिंतयच्चापतितमेतस्याहितमनाहतम् ।
अशरण्यामरण्ये मां प्रेयानपि मुमोच यत् ॥ ५४१ ॥
यद्वा मुखक्षालनाय प्राणेशो मे निशात्यये ।
गतो भविष्यति क्वापि वार्यानेतुं जलाशये ? ॥ ५४२ ॥
नीतो रमयितुं यद्वोपरुध्य नियतं नलः ।
कयाचिदपि [3]खेचर्या [4]तद्रूपालोकलुब्धया ॥ ५४३ ॥
क्रीडन् कलायां कस्यांचिज्जितो मन्ये तया च सः ।
कृतावस्थानपणतस्तस्थौ चाद्यापि नैति यत् ॥ ५४४ ॥
ते द्रुमा पर्वतास्तेऽपि तदरण्यं च सा च भूः ।
एकमेव न पश्यामि नलं कमललोचनम् ॥ ५४५ ॥
एवं चिंताप्रपन्ना सा दर्शं दर्शं दिशोऽखिलाः ।
प्राणनाथमपश्यन्ती निजं स्वप्नं व्यचारयत् ॥ ५४६ ॥

१ विकसितम् । २ कष्टम् । ३ विद्याधर्या । ४ नलरूपदर्शनलुब्धया ।

सहकारो नलो राजा राज्यं पुष्पफलादिकम् ।
फलास्वादो राज्यसुखं भृङ्गाः परिजनो मम ॥ ५४७ ॥
[1]सहकारतरुर्यश्चोन्मूलितो वनदन्तिना ।
राज्यादुत्थाप्य दैवेन प्रावास्यत स मे पतिः ॥ ५४८ ॥
यच्चास्मि पतिता वृक्षात्तद्भ्रष्टास्मि नलादहम् ।
स्वप्नेनानेन नूनं मे नलो दुर्लभदर्शनः ॥ ५४९ ॥
॥ त्रिभिर्विशेषकम् ॥

स्वप्नार्थमिति निर्णीय सा दध्याविति धीमती ।
न राज्यं न पतिश्चेति द्वयमापतितं मम ॥ ५५० ॥
[2]व्यलपन्मुक्तकण्ठं च सा तारं [3]तारलोचना ।
दुर्दशापतितानां हि स्त्रीणां धैर्यगुणः कुतः ? ॥ ५५१ ॥
हा नाथ ! मां किमत्याक्षीः ? किं भाराय तवाभवम् ? ।
न ह्यात्मीया कञ्चुलिका जातु भाराय [4]भोगिनः ॥ ५५२ ॥
[5]नर्मणान्तरितोऽभूस्त्वं यद्वा वल्लीवने क्वचित् ? ।
तत्प्रकाशो भव चिरं न हि नर्मापि [6]शर्मदम् ॥ ५५३ ॥
प्रार्थये वः प्रसीदन्तु मह्यं हे वनदेवताः ! ।
प्राणेशं दर्शयत मे मार्गं वा तत्पवित्रितम् ॥ ५५४ ॥
द्विधा भव धरित्रि ! त्वं [7]वालुंकमिव [8]पाक्रिमम् ।
त्वद्दत्तविवरेणाहं प्रविश्याप्नोमि [9]निर्वृतिम् ॥ ५५५ ॥

१ आम्रवृक्षः । २ उच्चैः । ३ दीर्घलोचना । ४ सर्पस्य । ५ हास्येन । ६ कल्याणदम् । ७ वालुंकं चिर्भटकं, भाषायां 'चीभडुं' इति । ८ पक्वम् । ९ शान्तिम् ।

एवं भैमी विलपंती रुदंती नयनोदकैः ।
सारणीवारिभिरिव सिषेचारण्यपादपान् ॥ ५५६ ॥
जले स्थले वा छायायामातपे वा नल विना ।
ज्वरसतया इव तस्या न निर्वृतिलवोऽप्यभूत् ॥ ५५७ ॥

—त्रिषष्टि० प० ८, स० ३, पृ० ५९ ।

[३३]

सगरचक्रवर्तिषष्टिसहस्रपुत्राणां मरणेऽन्तःपुरस्त्रीणां सेनाधिपतिसामन्तादीनां च विलापाः ।

चक्रिसैन्येऽथ सैन्यानामाक्रन्द उदभून्महान् ।
महाजलाशय इव, रिक्तीभवति [1]यादसाम् ॥ १ ॥
केऽप्यास्वादितकिम्पाका इव पीतविषा इव ।
सर्पदष्टा इवोन्मूर्च्छा, पेतुर्वसुमतीतले ॥ २ ॥
केचिदास्फालयामासुः, स्वशिरो नालिकेरवत् ।
केचिदाजघ्निरे वक्षः, [2]कृतागस्कमिवासकृत् ॥ ३ ॥
पादान् प्रसार्य केऽप्यस्थुः, कृत्यमूढाः पुरन्ध्रिवत् ।
[3]भृगूण्यारुरुहुर्झम्पां, कपिवत् केऽपि [4]दित्सवः ॥ ४ ॥
कूष्माण्डदारमुदराण्येके स्वानि दिदीर्षवः ।
चकृषुः क्षुरिकां कोशाद्यमजिह्वासहोदराम् ॥ ५ ॥

१ जलचरजीवानाम् । २ कृतापराधम् । ३ भृगूणि शिखराणि पर्वतात्पतनस्थानानीत्यर्थः । ४ दातुमिच्छवः ।

आत्मानं तरुशाखायामुद्बद्धुमनसोऽपरे ।
बबन्धुरुत्तरीयाणि, लीलादोलां[1] यथा पुरा ॥ ६ ॥
शिरसोऽत्रोटयन् केऽपि, केशान् क्षेत्रात्कुशानिव ।
केप्यंगलग्नं नेपथ्यं, चिक्षिपुः स्वेदबिंदुवत् ॥ ७ ॥
हस्तन्यस्तकपोलाः केऽप्यस्थुश्चिन्तापरायणाः ।
प्रदत्तोत्तंभनस्तम्भजर्जराकारकुड्यवत् ॥ ८ ॥
असंवहन्तः केचिच्च, परिधानांशुकान्यपि ।
[2]विशंस्थुलाङ्गा व्यलुठन्नुन्मत्ता इव भूतले ॥ ९ ॥
विलापोऽन्त पुरे स्त्रीणां, कुररीणा[3]मिवाम्बरे ।
हृदयाकम्पजनकः, पृथक् पृथगभूदिति ॥ १० ॥
प्राणेशान् गृह्णतास्माकं, प्राणानत्रैव मुञ्चता ।
किमर्ध[4]वैशसमिदं रे दैवाचरितं त्वया ? ॥ ११ ॥
प्रसीद विवरं देहि, स्फुटित्वा देवि ! [5]काश्यपि ! ।
[6]अभ्रादपि पतितानां, शरणं धरणी खलु ॥ १२ ॥
अद्य चंदनगोधानामिवास्माकमुपर्यहो ।
विद्युद्दण्डम[7]काण्डेऽपि, दैव ! पातय निर्दयम् ॥ १३ ॥
प्राणाः ! शिवा वः पन्थानो, यूयं यात यथेप्सितम् ।
विमुञ्चतास्मच्छरीरमवक्रयकुटीमिव ॥ १४ ॥
समायाहि महातन्द्रे, ! सर्वदुःखापनोदिनि ! ।
मन्दाकिनि ! त्वमुत्पत्य, जलमृत्युं प्रयच्छ वा ॥ १५ ॥

---

१ क्रीडादोलाम् । २ शिथिलाङ्गाः । ३ मृगीणाम् । ४ अर्धमरणम् । ५ हे पृथ्वि ! । ६ आकाशात् । ७ असमये ।

अस्यां गिरितलाटव्यां, प्रादुर्भव दवानल ! ।
अनुयामः पतिगतिं, तव साहाय्यकाद्यथा ॥ १६ ॥
हा केशपाश ! मुञ्चाद्य, सुमनोदामसौहृदम् ।
युवाभ्यां दीयतां नेत्रे !, कज्जलाय जलाञ्जलिः ॥ १७ ॥
पत्रलेखनकण्डूतिं, मा कृथाथां कपोलकौ ! ।
अलक्तकैर्व्यतिकरश्रद्धामधर ! मा धरः ॥ १८ ॥
गीताकर्णनवत्कर्णौ !, त्यजतं रत्नकर्णिकाम् ।
हे कंठ ! कंठिकोत्कंठां मा कार्षीस्त्वमतः परम् ॥ १९ ॥
वक्षोजावद्य वां हारो, ³नीहारोंऽभोरुहामिव ।
सद्यो हृदय ! भूयास्त्वं, पक्वैर्वारुकवद् द्विधा ॥ २० ॥
बाहू ! कङ्कणकेयूरैर्भारैरिव कृतं च वाम् ।
नितम्ब ! रसनां मुञ्च, प्रातश्चन्द्र इव प्रभाम् ॥ २१ ॥
अनाप्तैरिव पर्याप्तं, हे पादौ ! पादभूषणैः ।
अलमंगांगरागैस्तैः, कैंपिकच्छूमयैरिव ॥ २२ ॥
एवमंतःपुरस्त्रीणां, हृदि तैः करुणस्वरैः ।
वनान्यपि प्रतिरवै-रुरुदुः सह बन्धुवत् ॥ २३ ॥
सेनाधिपतिसामन्त-मण्डलेशादयोऽपि हि ।
शोकह्रीक्रोधशङ्कादि-विचित्रं प्रालपन्निति ॥ २४ ॥
हा स्वामीपुत्राः ! क्व गता न हि संविद्महे वयम् ।
भूतानुयामोऽद्य यथा, स्वामिशासनतत्पराः ॥ २५ ॥

१ पुष्पमाला । २ संबन्धः । ३ हिमम् । ४ कर्कटीवत् । ५ अलम् । ६ हे अंग ! । ७ कण्डुजनक औषधिविशेषः ।

किं [1]तिरोधानविद्येह, भवतां काप्युपस्थिता ।
सा तु खेदाय भृत्यानां, प्रयोक्तुं नहि युज्यते ॥ २६ ॥
युष्मान्नष्टान् विनष्टान् वा, हित्वा गतवतां सुखम् ।
कथं द्रक्ष्यति नः स्वामी, ऋषिहत्याकृतामिव ? ॥ २७ ॥
युष्मान्विना गतान्नोऽद्य, लोकोऽप्युपहसिष्यति ।
हृदय ! स्फुट रे सद्यः, पयःसिक्ता[2]मकुम्भवत् ॥ २८ ॥
तिष्ठ तिष्ठा[3]हिखेट ! त्वं, छलेन श्वेव नः पतीन् ।
व्यग्रानष्टापदत्राणे, दग्ध्वायासीः क रेऽधुना ? ॥ २९ ॥
खड्गः खड्गो धन्व धन्व, शक्तिः शक्तिर्गदा गदा ।
युद्धाय सज्जीभव रे, कियन्नंष्ट्वा गमिष्यसि ? ॥ ३० ॥
अमी तावदिह त्यक्त्वा, ययुर्नः स्वामिसूनवः ।
ह हा तत्र गतानद्य, त्यक्ष्यति स्वाम्यपि द्रुतम् ॥ ३१ ॥
अगतानपि नस्तत्र, जीवतोऽत्रैव तिष्ठतः ।
श्रुत्वा लज्जिष्यते स्वामी, यदि वा निग्रहीष्यति ॥ ३२ ॥
एवं रुदित्वा विविधं, भूयः संभूय ते मिथः ।
[4]सहजं धैर्यमालम्ब्य, मन्त्रयामासुरित्यथ ॥ ३३ ॥
पूर्वोदितै[5]र्विधानेभ्यः, परोक्तविधिर्वद्विधिः ।
सर्वेभ्यो बलवांस्तस्मान्न कोऽपि बलवत्तरः ॥ ३४ ॥
तत्राशक्यप्रतीकारे, मुधा प्रतिचिकीर्षितम् ।

१ अदृश्यकरणविद्या । २ अपक्वः । ३ हे नागराज ! । ४ स्वाभाविकम् । ५ पूर्वविधिभ्यः परोविधिर्बलवान् इति नियमेन । ६ दैवम् ।

व्योम्नः प्रतिजिघांसेव जिघृक्षेव नभस्वतः ॥ ३५ ॥
एभिः प्रलपैस्तदलं, हस्त्यश्वाद्यखिलं प्रभोः ।
इदानीमर्पयामः स्वं, वयं न्यासधरा इव ॥ ३६ ॥
उचितं रुचितं चापि, यत्किञ्चन ततः परम् ।
विदधातु तदस्मासु, स्वामी किं नो विचिन्तया ॥ ३७ ॥
एवमालोच्य ते सर्वे, सर्वमन्तःपुरादिकम् ।
आदाय दीनवदनाः, प्रत्ययोध्यं प्रतस्थिरे ॥ ३८ ॥
मन्दमन्दमथोत्साहहीना म्लानाननेक्षणाः ।
अयोध्यासन्निधिभुवं प्रापुः सुप्तोत्थिता इव ॥ ३९ ॥
[3]विषण्णास्तत्र च स्थित्वा, नीता वध्यशिलामिव ।
उपविश्य महीपीठेऽन्योऽन्यमेवं बभाषिरे ॥ ४० ॥
भक्ता बहुज्ञा दोषमन्तो, दृष्टसाराः पुरापि च ।
इत्यादिष्टा वयं राज्ञा, सत्कृत्य तनयैः सह ॥ ४१ ॥
विना कुमारानभ्येत्य, स्वामिनोऽग्रे वयं कथम् ।
वदनं धारयिष्यामो, नासिकारहिता इव ? ॥ ४२ ॥
कथं वा कथयिष्यामः, पुत्रवृत्तान्तमीदृशम् ? ।
[4]अकाण्डाशनिसम्पात-सदृशं वसुधापतेः ॥ ४३ ॥
अतः परमहो तत्रास्माकं गन्तुं न युज्यते ।
युज्यते किंतु मरणं, शरणं सर्वदुःखिनाम् ॥ ४४ ॥
सम्भावनायाः प्रगुणीकृताया भ्रंशभाजिनः ।

१ प्रति हंतुमिच्छा । २ ग्रहीतुमिच्छा । ३ खिन्नाः । ४ असमये वज्रपात इव ।

पुंसो शरीरिकस्येव, जीवितव्येन किं ननु ? ॥ ४५ ॥
किं च पुत्रक्षयं श्रुत्वा, दुःश्रवं चक्रवर्त्यपि ।
चेद्व्रिपद्येत तदपि, मृत्युरग्रेसरो हि नः ॥ ४६ ॥
मन्त्रयित्वेति ते सर्वे, मरणे कृतनिश्चयाः ।
यावत्तस्थुस्तावदागादेकः कैाषायभृद्द्विजः ॥ ४७ ॥

—त्रिषष्टि० प० २, स० ६, पृ० ८६–८७

---

[३४]

षष्टिसहस्रपुत्राणां मरणश्रवणे सगरचक्र्यादीनां विलापः ।

नाशेनैकस्य पुत्रस्य न शोचिष्याम्यतःपरम् ।
मद्वत्वमपि मा शोचीः सर्वपुत्रक्षयेऽपि हि ॥ १५४ ॥
षष्टिसहस्रसंख्यास्ते, दोर्विक्रमविराजिनः ।
राजन् ! विपन्नास्तनया, युगपत् कालयोगतः ॥ १५५ ॥
अत्रांतरे च सामन्तामात्यसेनाधिपादयः ।
अपरेऽपि कुमाराणां, जना आसन्नवर्तिनः ॥ १५६ ॥
उत्तरीयछन्नमुखाः, शालीना इव लज्जया ।
विवर्णदेहाः खेदेन दैवदग्धा इव द्रुमाः ॥ १५७ ॥
अत्यंतशून्यमनसः, पिशाचकिङ्करा इव ।
उदश्रुलोचना दीना मुषिताः कृपणा इव ॥ १५८ ॥

---

१ म्रियेत । २ काषायवस्त्रधारी । ३ लज्जावन्त इव । ४ वनाग्निदग्धाः ।

प्रस्खलच्चरणन्यासा, दृष्टा इव भुजङ्गमैः ।
[1]आस्थानं युगपद्राज्ञोऽविशन् सङ्केतिता इव ॥ १५९ ॥

॥ चतुर्भिः कलापकम् ॥

राजानं ते नमस्कृत्य, यथास्थानमुपाविशन् ।
[2]विविक्षव इव क्षोणीं, ते च तस्थुरधोमुखाः ॥ १६० ॥

तां विप्रवाचमाकर्ण्य, दृष्ट्वा तांश्च तथाविधान् ।
कुमारवर्जमायातान्[3]निषादिद्विपानिव ॥ १६१ ॥

लिखितो नूल्लिखितो नु, सुप्तो नूत्तम्भितो नु वा ।
शून्यो निष्पन्दनयनो, द्रागभूद्वनीपतिः ॥ १६२ ॥

॥ युग्मम् ॥

आसमूर्छमधैर्येण धैर्येण च [4]तथास्थितम् ।
पुनर्बोधयितुं विप्रः, प्रोवाच पृथिवीपतिम् ॥ १६३ ॥

त्वमसि [5]क्ष्मापते ! विश्वमोहनिद्राविवस्वतः ।
ऋषभस्वामिनो वंश्यो, भ्राताचास्यजितप्रभोः ॥ १६४ ॥

इत्थं [6]पृथग्जन इव, भवन्मोहवशंवदः ।
[7]तयोः कलङ्कमादत्सेऽधुना किं धरणीधव ! ॥ १६५ ॥

राजापि दध्यौ विप्रोऽयं, [8]स्वपुत्रांतापदेशतः ।
मत्पुत्रक्षयनाख्यस्य, जगौ प्रस्तावनामिमाम् ॥ १६६ ॥

---

१ सभामण्डपम् । २ प्रविष्टुमिच्छवः । ३ हस्तिपकशून्यगजानिव ।
४ स्वस्थम् । ५ हे राजन् । ६ सामान्यजन इव । ७ ऋषभाजितस्वामिनोः ।
८ स्वपुत्रमरणमिषात् ।

व्यक्तं च शंसत्यधुना, कुमाराणामसौ क्षयम् ।
कुमारवर्जमायाताः प्रधानपुरुषा अमी ॥ १६७ ॥
कुतः सम्भाव्यते तेषां, क्षयश्च मनसापि हि ।
भुवि सञ्चरतां स्वैरं, वने केसरिणामिव ॥ १६८ ॥
महारत्नपरीवारा, दुर्वाराः स्वौजसापि हि ।
केन शक्या निहन्तुं ते, हंतास्खलितशक्तयः ? ॥ १६९ ॥
चिंतयित्वेति किमिदमिति पृष्टाः क्षमाभुजा ? ।
ज्वलनप्रभवृत्तान्तं, शशंसुः सचिवादयः ॥ १७० ॥
ताडितः कुलिशेनेव, तेनोदंतेन[1] भूपतिः ।
पपात मूर्छितः पृथ्व्यां, पृथिवीमपि कम्पयन् ॥ १७१ ॥
मातरश्च कुमाराणां, निपेतुर्मूर्छया क्षितौ ।
पितुर्मातुश्च तुल्यं हि, दुःखं सुतवियोगजम् ॥ १७२ ॥
राजवेश्मनि लोकानामाक्रन्दोऽथ महानभूत् ।
समुद्रतटगर्तांतर्गतानां यादसामिव ॥ १७३ ॥
मन्त्र्यादयोऽपि ते स्वामिपुत्रव्यापत्ति[2]साक्षिणम् ।
आत्मानमतिनिन्दन्तो, रुरुदुः करुणस्वरम् ॥ १७४ ॥
तादृशीं स्वामिनोऽवस्थां, तां वीक्षितुमिवाक्षमाः ।
अंजलिच्छन्नवदनाः, पूच्चक्रुर्वेत्रपाणयः[3] ॥ १७५ ॥
प्राणप्रियाण्यप्यस्त्राणि, त्यजन्तश्चात्मरक्षकाः ।
प्रलपन्तोऽलुटन् भूमौ, वातभग्ना इव द्रुमाः ॥ १७६ ॥

१ वृत्तान्तेन । २ व्यापत्तिर्मरणम् । ३ द्वारपालाः ।

स्वकञ्चुकान् कञ्चुकिनः, स्फाटयन्तोऽरटन् भृशम् ।
दैवानलान्तः पतिता, इव तित्तिरिपक्षिणः ॥ १७७ ॥
हृदयं कुट्टयन्तः स्वं, चिरात्प्राप्तमिव द्विषम् ।
चेट्यश्चेटाश्च चक्रन्दुर्हताः स्म इति भाषिणः ॥ १७८ ॥
तालवृन्तानिलेनाम्बुसेकेन च महीपतिः ।
राज्यश्च संज्ञामासेदुर्दुःखैशल्यप्रतोदनीम् ॥ १७९ ॥
मैलिनीभूतवासस्का, नेत्राश्रुजलकज्जलैः ।
छाद्यमानकपोलाक्ष्यो लुँलितालकवल्लिभिः ॥ १८० ॥
उरःस्थलकराघातप्रत्रुटद्धारयष्टयः ।
निर्भरं भूमिलुठनस्फुटत्कंकणमौक्तिकाः ॥ १८१ ॥
धूमं शोकानलस्येवोज्झन्त्यो निःश्वासमुच्चकैः ।
शुष्यत्कण्टाधरदला, राजपत्न्योऽरुदन्नथ ॥ १८२ ॥
॥ त्रिभिर्विशेषकम् ॥

धैर्यं लज्जां विवेकं च, विहायैकपदेऽपि हि ।
राज्ञीवच्छोकविधुरो, विललापेति भूपतिः ॥ १८३ ॥
हे कुमाराः ! क्व यूयं स्थ, निवर्तध्वं विहारतः !
राज्यायावसरो वोऽद्य, व्रताय सगरस्य तु ॥ १८४ ॥
कथं न कोऽपि ब्रूते च, सत्यमुक्तं द्विजन्मना ? ।
दैस्युनेव छलज्ञेन, दैवेन मुँषितोऽस्मि ही ॥ १८५ ॥
अरे रे दैव ! कुत्रासि, कुत्रासि ज्वलनप्रभ ! ।

१ वनाग्निमध्ये । ४ दुःखशल्यनाशनीम् । । ३ मलिनीभूतवस्त्राः । ४ विकीर्णकेशसमूहैः । ५ चौरेणेव । ६ चोरितोऽस्मि ।

अक्षत्रमिदमाचर्य्य कायासीर्नागपांशन ! ॥ १८६ ॥
सेनापते ! क्व तेऽगच्छत्चंडदोर्दण्डचण्डिमा ? ।
क्षेमङ्करत्वमगमत्, क्व पुरोहितरत्न ! ते ? १८७ ॥
गलितं वर्धके ! किं ते, दुर्गनिर्माणकौशलम् ? ।
गृहिन् ! संजीवनौषध्यः, किं ते कुत्रापि विस्मृताः ? ॥१८८॥
गजरत्न ! किमाप्तस्त्वं, तदा गजनिमीलिकाम् ! ।
अश्वरत्न ! समुत्पन्नं, शूलं किं भवतस्तदा ? ॥ १८९ ॥
चक्रदंडाऽसयो ! यूयं, किं तदानीं तिरोहिताः ? ।
अभूतां मणिकाकिण्यौ, निष्प्रभौ किं दिनेन्दुवत् ? ॥ १९० ॥
आतोद्यपुटवद्भिन्ने, किं युवां छत्रचर्मणी ! ।
नवापि निधयो ! यूयमस्ताः किमनया भुवा ? ॥ १९१ ॥
युष्मद्विश्वासतोऽशंकं, रममाणाः कुमारकाः ।
सर्वैरपि न यत्त्रातास्तस्मात् पन्नगपांसनात् ॥ १९२ ॥
करोम्येवं विनष्टे किमिदानीं ज्वलनप्रभम् ? ।
सगोत्रमपि चेद्धन्मि न हि जीवंति मत्सुताः ॥ १९३ ॥
ऋषभस्वामिनो वंशे, नैवं कोऽप्यासदन्मृतिम् ? ।
त्रपाकरमिमं मृत्युं, हा वत्साः कथमाप्नुत ? ॥ १९४ ॥
पूर्वे मदीयाः सर्वेऽपि, पुरुषायुषजीविनः ।
दीक्षामाददिरे स्वर्गमपवर्गं च लेभिरे ॥ १९५ ॥
स्वेच्छाविहारश्रद्धापि, भवतां नह्यपूर्यत ।

---

१ नागदूषकः । २ नेत्रनिमीलिकाम् । ३ मोक्षम् ।

अरण्यानीसमुत्पन्नभूरुहामिव दोहदः ॥ १९६ ॥
उदयाय च पूर्णेन्दुर्दैवाद् ग्रस्तश्च राहुणा ।
फलेग्रहिश्च सञ्जज्ञे, तरुर्भग्नश्च कुम्भिना ॥ १९७ ॥
आगता च तरी तीरं, भग्ना च तटभूभृता ।
उन्नतश्च नवाम्भोदो, विकीर्णश्च नभस्वता ॥ १९८ ॥
निष्पन्नं च व्रीहिवणं, दग्धं च नववह्निना ।
धर्मार्थकामयोग्याश्च, जाता यूयं हताश्च हा ॥ १९९ ॥

॥ त्रिभिर्विशेषकम् ॥

प्राप्यापि मद्गृहं वत्सा !, अकृतार्था गता ह हा ।
आढ्यस्य कृपणस्येव, वेश्मोपेत्य वनीपकाः ॥ २०० ॥
तदद्य किमु चक्राद्यै, रत्नैर्निधिभिरप्यलम् ? ।
युष्मान् विना विरहिणो, ज्योत्स्नोद्यानादिकैरिव ॥ २०१ ॥
षट्खंडभरतक्षेत्रराज्येन यदि वाऽसुभिः ।
असुभ्योऽपि प्रियैः पुत्रैर्विना भूतस्य किं मम ? ॥ २०२ ॥
एवं विलापिनमथो, भूनाथं श्रावकद्विजः ।
स बोधयितुमित्यूचे, सुधामधुरया गिरा ॥ २०३ ॥

—त्रिषष्टि० प० २, स० ६, पृ० ९१–९३

---

१ महदरण्यम् । २ वृक्षाणामिव । ३ मनोरथः । ४ फलवान् । ५ हस्तिना । ६ नौका । ७ नूतनमेघः । ८ वायुना । ९ शालिवनम् । १० याचकाः । ११ प्राणैः ।

[३५]

प्रियायाश्च्यवने ललिताङ्गस्य आक्रन्दः ।

हा दयिते ! हा दयिते !, क्वासि क्वास्येहि दर्शनं देहि ।
यत् त्वां विना त्रिदिवमपि, दुःखकरं नरकवज्जाने ॥ ७६ ॥
सततं त्वयि चाटुरसे, मम वचसि प्राप नापराऽवसरम् ।
त्वद्वदनेन्दुज्योत्स्ना—पानरते दृक्चकोरे च ॥ ७७ ॥
अस्वप्नस्य ममास्तु, स्वप्नेऽप्यन्याश्रयः प्रिये ! कस्मात् ।
लवमात्रं त्वद्विरहा—सहेऽत्र मयि तत् कथं कोपः ? ॥७८॥—युग्मम्॥
न कदापि त्वं कुपिता, मयाऽनुनीताऽपि नैव तेन त्वम् ।
अनुनयसुखाय कृतकं, कृत्वा कोपं स्थिता क्वापि ॥७९॥
ज्ञातमिदं तेन त्वां, नन्दनवनकल्पवल्लिकुञ्जान्तः ।
निजवल्लभां निभाल्य, क्रमपतितोऽनुनयमेवकर्ताऽहम् ॥८०॥
इति बुद्ध्यैव स नन्दन—वने भ्रमन् प्रतिनिकुञ्जमित्यूचे ।
हा सुमुखि ! हा घनस्तनि, हा सुश्रोणि ! किमिहापि न त्वमसि ॥८१

—पद्मानन्दकाव्यम् स० ४

---

१ अन्या योषित् । २ कोपापनयसुखाय । ३ कृत्रिमम् ।

[३६]

वृषभस्वामिनिर्वाणकल्याणे भरतस्य परिदेवनम्।

अस्तोकशोकसंछन्नो, भरतो मूर्च्छयाऽपतत् ।
दुःखच्छेदि तदाऽज्ञासीन् न कोऽपि रुदितुं यतः ॥ २१४ ॥

चक्रिणं ज्ञापयन् दुःखखेदभेदनकारि तत् ।
शक्रः सङ्क्रन्दनं, चक्रे, समग्रैस्त्रिदशैः सह ॥ २१५ ॥
रुदितैरुदितैस्तेषां, विमूर्च्छश्चक्रवर्त्यपि ।
रुरोद रोदसीक्रोडं, पूत्कारैः परिपूरयन् ॥ २१६ ॥

रुदितेन क्षणात् तेन, शोकोऽन्तश्चक्रवर्तिनः ।
कुठारस्फारघातेन, दारुवत् प्राप दीर्णताम् ॥ २१७ ॥
दुःखशल्याकुलस्वान्तविशल्यीकारकारणम् ।
तदादि किल लोकेऽपि, शोकेऽभूद् रुदितक्रमः ॥ २१८ ॥
विललाप ततः क्ष्मापः, सन्त्यज्येत्यात्मधीरताम् ।
हा तात ! हा जगत्त्रातस्त्यक्त्वा मां गतवानसि ॥ २१९ ॥
बाहुबल्यादयस्तेऽपि भ्रातरो मम निर्ममाः ।
स्वसारौ ब्राह्मी-सुन्दर्यौ, पुण्डरीकादयोऽङ्गजाः ॥ २२० ॥
श्रेयांसप्रमुखाः पौत्रा, मां मुक्त्वैकाकिनं हहा ।
प्रक्षीणाखिलकर्माणो, निर्वाणपदमाश्रयन् ॥ २२१ ॥
जीवाम्यद्यापि पापोऽहं, राज्यमोहं त्यजामि न ।
त्वद्धर्मदेशनाशर्म, त्वां विना नाथ ! कुत्र मे ? ॥ २२२ ॥

१ रोदनम् । २ नृपः । ३ पुत्राः ।

मोहप्ररोहणादेवमुद्दिलापमिलापतिम् ।
प्रबोधमधुरैर्वाक्यैर्बोधयामास वासव१: ॥ २२३ ॥

—पद्मानन्दकाव्यम् स० १८

[३७]

प्रभोर्दर्शनवञ्चनात् बाहुबलेर्विलापः ।

तदाकर्ण्य वचः कर्ण-कीलं, तं२क्षशिलापतिः ।
सद्यो दधार धीरोऽपि, नेत्रे बा३ष्पजलाविले ॥ ३७४ ॥

दध्यौ वन्ध्योद्यमश्चेति, चेतितं न मयेति यत् ।
व्रतात् प्रभृति नैकत्रा-वस्थितिं कुरुते प्रभुः ॥ ३७५ ॥

अपि प्रकृतिपौराद्याः प्राप्नुवन्तु पवित्रताम् ।
इति तै सह वन्दिष्ये, स्वामिपादान् दिनोदये ॥ ३७६ ॥

मनोरथो मे भग्नोऽ४यमभाग्योद्धातपाततः ।
हाहा हतोऽस्म्यहं पापो, निष्पुण्यानां शिरोमणिः ॥३७७॥

—युग्मम् ॥

विलंबकारिणं धिग् मां लोकानुग्रहकारणात् ।
परार्थकाम्यया मौर्ख्यात्, स्वार्थभ्रंशोऽभवन्मम ॥ ३७८ ॥

धिग् मामबुद्धिमूर्द्धन्यं, धिग् धिग् मां च प्रमादिनम् ।
यत् तातचरणाब्जानामर्चनेनास्मि वंचितः ॥ ३७९ ॥

१ इन्द्रः । २ बाहुबलिः । ३ अश्रुपरिपूर्णे । ४ अभाग्योदयात् ।

वृथा मम समुत्पन्नो, विभ्रमो यद् [1]विभावरी ।
तद्दिनं दृश्यते यस्मिन्निनो विश्वप्रकाशकः ॥ ३८० ॥

भास्वंतं सवितारं तं, विनाऽह्नरपि [3]शर्वरी ।
जाता यन्मे तमोजालैः किलान्धाः सकला दिशः ॥३८१॥

प्रमाद्सदनं स्वामिन्!, यद्यहं तत् कथं त्वया ।
नात्मपुत्रप्रमोदाय, दिनमेकमपि स्थितम् ? ॥ ३८२ ॥

लोकेष्वपत्यवत् पूर्वं, ममत्वमकृथा यथा ।
सांप्रतं निर्ममत्वं तं, तथाऽपत्येषु लोकवत् ॥ ३८३ ॥

धिग् मामेकदिनाहार-ग्रहणेनापि न प्रभुः ।
मानितस्त्रिजगन्मान्यो, जनसामान्यनप्यहो ॥ ३८४ ॥

त्वद्संभावनोद्भूतं, [4]मन्मूतं, मे पराभवम् ।
अपनेष्यति को नाम, नाथ ! नाथं विना परः ? ॥३८५॥

यावत् तेऽजनि वात्सल्यं, सर्वेष्वन्येषु सूनुपु ।
मय्यासीत् तावदेकस्मिन्, कुत्र तत् ते गतं प्रभो! ॥३८६॥

बाल्येऽपि हृदयक्रोडे, सदा मां कृतवानसि ।
संप्रत्यपि ततो नाथ!, हृन्मध्ये धृतवान्न किम् ? ॥३८७॥

लोकभर्तुरनालोक-शोकशंकाऽतिसङ्कुलम् ।
ततस्तं विषमूर्च्छालमिव मन्त्रीत्यबोधयत् ॥ ३८८ ॥

—पद्मानन्दकाव्यम् स० १३

---

१ रात्रिः । २ स्वामी । ३ निशा । ४ तवासत्कारजन्यम् ।

[३८]

पुत्रवियोगे मरुदेवाया विलापः ।

भरते नृपतौ पुरःस्थिते, स्मृतपुत्रेश्वरतापरोन्नतिः ।
स्रवदश्रुविमिश्रलोचना, मरुदेवा व्यलपत्तरामिति ॥११७॥
क्व तदाऽऽतपवारणं पुरा, मम सूनोः शिरसीन्दुसुन्दरम् ? ।
अधुना क्व दवानलोल्वणं, तपचण्डं तपनांशुमण्डलम् ? ॥११८॥
क्व स चामरचारुचालनैश्चलनंत्राकरकंकणक्वणः ? ।
श्रवसोरधुना सुतस्य मे, मशकश्रेणिगुणत्कृतिः क्व सा ? ॥११९॥
क्व पुरा रथवारणादिभिः सुखयानानि ममाङ्गजन्मनः ।
अधुना क्व पदातिचारिता, चरणत्राणमृते विहारिणः ? ॥१२०॥
मणिपद्ममुखासने सुखा-सनमन्तः, सदनं क्व तस्य तत् ? ।
क्व निरासनता वनान्तरे, गिरिशीर्षे निरतस्य साम्प्रतम् ॥१२१॥
क्व तदस्य सदैव देवतोपहृताहारजलोपजीवनम् ।
क्व स सम्प्रति भैक्ष्यसम्भृता—भ्यवहारस्तदसम्भवोऽपि वा ॥१२२॥
श्रवणामृतवर्षणं क्व तन्—मृदुगीतं शयने द्युसुभ्रुवाम् ।
क्व वनेऽस्य सुतस्य साम्प्रतं—श्रुतिसूचीघनघूकघूत्कृतिः ॥१२३॥
स्तनयित्नुकृतं तपात्ययो—द्धुरधाराजलमुल्बणानिलम् ।
सहते स तमस्विनीषु ही, गिरिसंगी गजवन्ममाङ्गजः ॥१२४॥

---

१ छत्रम् । २ सूर्यमण्डलम् । ३ कर्णयोः । ४ गणगणाटशब्दः । ५ उपानद्विना । ६ देवाङ्गनानाम् । ७ कर्णयोः सूचीतुल्या । ८ मेघकृतम् । ९ वर्षाकाले ।

कमलाकरवद् वनाश्रयो, हिमसन्दोहमयानिलोर्मिभिः ।
रजनीषु स हैमनीषु ही, क्रममेत्यावरणेन वर्जितः ॥ १२५ ॥
भृशमुष्णऋतौ सुदारुणैः, किरणैरुष्णरुचेश्चिरं स्थिरैः ।
म्लपिताननीरजोऽङ्गजः, स सरोवत् परितोऽपि शुष्यति ॥ १२६ ॥
स निरावरणो निराश्रय-स्तनयो मे [२]विसहाय एव हा ।
शबरो गिरिगः स्फुरद् यथा, खलु कालेष्वखिलेषु दुःखितः ॥ १२७ ॥
पृथिवीं परिपालयन्त्यमी, भरतो बाहुबलिः सुता परे ।
न तु कोऽपि करोति संकथामपि सूनोर्मम धिग् विधिक्रमः ॥ १२८ ॥
इति सन्ततसंस्मृते सुतं, [३]पुरतः सङ्गतवद् विजानती ।
इदमालपति स्म सा भृशं, समुपालम्भनकारिवाग्भरा ॥ १२९ ॥
न कदापि ददासि दर्शनं, विशदज्ञाननिधानमानस ! ।
किमु वत्स ! न वेत्सि वत्सलां, जननीं शोकसमाकुलामिमाम् ॥ १३० ॥
जरतीत्यवधीरणाऽस्ति चेन् मयि पौत्राः प्रतिपौत्रकास्ततः ।
किमु [५]लल्लुरजल्पिनोऽपि नो, कथमुक्तं प्रथयन्ति ते मनः ? ॥ १३१ ॥
अनुगै रहितोऽसि वत्स, तैरपि कच्छप्रमुखैः क्षितीश्वरैः ।
कथमेकक एव कानने, चरसि क्रूरमृगारिभैरवे ॥ १३२ ॥
अनुगम्य भवन्तमात्मजं, स्वमवश्यं [६]वरिवस्ययाम्यहम् ।
तव दुःखजरोदनाश्रुभिः, किमु कुर्वे बत लुप्तलोचना ? १३३ ॥
भजति त्वयि राज्यमुज्ज्वलं, सुख[७]मुन्मेषमियेष यन्मयि ।
अधुना विपिनं श्रयत्यभू-दसुखं कोटिगुणं ततः सुत ! ॥ १३४ ॥

१ भानोः । २ सहायरहितः । ३ अग्रतः स्थितमिव । ४ अपमानः ५ अव्यक्तमधुरजल्पिनः । ६ सेवां करोमि । ७ प्रादुर्भावम् ।

इति सा भृशमात्मैसम्भवाऽसुखसम्भावनयाऽभिभाविता ।
गलदश्रुजलप्लुतांशुका, व्यलपत् कल्पितमौलिचालना ॥१३५॥

—पद्मानन्दकाव्यम् स० १४

[३९]

गुरोः स्वर्गलोकगमने विजयसेनसूरेर्विलापः ।

श्रुत्वा तद्वज्राहत इवाभवद्बाष्पपूर्णनयनयुगः ।
एष पुनर्दुःखादिदमंजीगदद्गद्गदध्वनितः ॥ २०२ ॥

उच्छिन्नः सुरभूरुहोऽप्यपगता स्वर्धामधेनुः पुन-
भग्नः कामघटो मणिः सुमनसां चूर्णीबभूव क्षणात् ।
दग्धा चित्रलता गतः शकलतां हा दक्षिणावर्तभू-
र्लम्बुः स्वर्गिगृहं गते त्वयि गुरौ श्रीहीरसूरीश्वर: (र!)॥२०३॥

हा हा भूधनबोधनैकविबुध ! श्रीसूरिचूडामणे !
हा सिद्धान्तसमुद्रमन्दरगिरे ! हा शासनाहर्मणे ! ।
हा हा यौक्तिकवाक्पुरन्दरगुरो ! वैराग्यवारांनिधे !
हा कारुण्यनिधे ! विधेर्वशतया त्वं कुत्र यातः प्रभो ! ? ॥२०४॥

अथास्तं गतवान्सहस्रकिरणश्चन्द्रोऽपि तन्द्रां गतः
शुष्कः क्षीरनिधिर्विधेर्विलसितैर्मेरुर्विलीनः पुनः ।

---

१ पुत्रदुःखविचारणया । २ वदति स्म । ३ कल्पवृक्षः । ४ कामधेनुः । ५ शङ्खः । ६ (अकब्बर) नृपप्रतिबोधनेऽद्वैतनैपुण्यवान् । ७ सूर्यः । ८ युक्तियुक्तवाचि वाचस्पतिः । ९ समुद्रः । १० निद्राम् ।

भूमौ श्रीजिनसार्वभौमविभवभ्राजिष्णुतां बिभ्रति
श्रीसूरीश्वरहीरहीरविजये गीर्वाणगेहं गते ॥ २०५ ॥

गर्जन्ति प्रतिमन्दिरं प्रमुदिता मिथ्यादृशः कौशिकाः
श्रीमत्संघसरोजकाननमिदं म्लानिं च धत्तेऽधुना ।
संप्राप्तप्रसराः स्फुरन्ति परितो नैक्तञ्चरा दुर्दृशो
यातेऽस्तं गवि हीरसूरितरणौ स्फूर्तिं तमः शीलति ॥२०६॥

—हीरसौभाग्यम् स० १७

[४०]

श्रीहीरविजयसूरिविरहे विजयसेनसूरे-विलापद्वात्रिंशिका ।

ममानिशं यत् त्वमवोच ईश ! सुत ! त्वमास्से मम चेतसीति ।
ययावजाकण्ठकुचोपमां तत् समस्तमुच्चैरभिजात ! तात ! ॥ ४७ ॥

यदर्धनिर्वर्णितमङ्गनानां दिवो दिदृक्षुः प्रसभं प्रसन्नम् ।
भवामि यावत्पदपद्मभृङ्गस्तवात्र तावद् न विलम्बितस्त्वम् ॥४८॥

ममाऽभवद् या भगवंस्त्वदंह्रिसरोजयोः श्रीः पुरतः स्थितस्य ।
त्वदाननन्यस्तविलोचनस्य सुदुर्लभा साऽथ नभोलतेव ॥ ४९ ॥

१ तीर्थङ्करलक्ष्मीशोभनशीलताम् । २ घूकसदृशाः । ३ चौरा इव । ४ कुतीर्थिकाः । ५ पृथिव्यां गगने च । ६ रविः । ७ हे कुलीन ! । ८ देवाङ्गनानां कटाक्षोत्क्षेपरूपमर्धावलोकनम् । ९ शोभा । १० गगनवल्लीव ।

विधाय भूमीस्पृशि भालभागेऽञ्जलिं मम [1]प्राञ्जलमञ्जुलस्य ।
भवन्निदेशं सृजतोऽभवद् [2]मुत् क्व साऽथ नाथा[3]ऽमृतमुल्लतेव ? ॥५०॥
पुरातनर्षिव्रजराजराजं विना भवंतं भुवनैकदीपम् ।
कमत्र तातेति भणन्न[4]भीक्षणमहं भविष्यामि [5]विनीतविद्यः ? ॥५१॥
रतिर्ममासीद[6]ममेश ! योच्चैः प्रपश्यतस्त्वन्मुखपुण्डरीकम् ।
अथाब्जिनीवाऽ[7]श्मनि सा भवित्री कथं कथं नाथ! हृदीति मन्ये? ॥५२
[8]करोत्करस्येव रविं भवन्तमभूद् मम श्रीरनुगच्छतो या ।
लतेव सिक्ताऽम्बुधैरः कदा सा पुरा [9]भवत्युन्नतिभाक् प्रकामम् ? ॥५३॥
प्रजाभिर्धेह्यहि भणेति भव्यैर्वचोभिरासंस्तव या मुदो मे ।
न तद्भवोऽप्यर्थिजनप्रणीतैस्त्वमेधिथा जीव जयेतिवाक्यैः ॥ ५४ ॥
विना तवाज्ञामथ [10]मुक्तिकान्तानिषंगदूतीं निजमूर्ध्नि कस्य ।
निदेशमेणी[11]नयनेव पुण्ड्रं श्रियः पदं नित्यमहं निधास्ये ? ॥ ५५ ॥
त्वयि प्रयातेऽस्तमनन्तकान्तौ [12]पयोजिनीभर्तरि भव्य[13]पद्म ।
ध्रुवं भवित्री भरतावनीयं [14]कुपाक्षिकोल्लूकतमःप्रसारा ॥ ५६ ॥
विना भवंतं [15]गृहरत्नमीश ! सुदीप्तमाधाय कमुत्प्रकाशः ।
[16]शिवाध्वनीनो हृदि धाम्नि भावी जनः समस्तो भरतावनीजः ॥५७॥
सुधर्ममुख्यर्षिमतंगजानां धृता त्वया [17]वामगतेन या धूः ।

---

१ सरलः । २ हर्षः । ३ कल्पवल्लीव । ४ वारंवारम् । ५ अभ्यस्तविध । ६ हे निर्ममेश ! । ७ दृषदि । ८ किरणपुञ्जस्य । ९ भविष्यतीत्यर्थे । १० मुक्तिवधूसङ्गदूतीम् । ११ कामिनीव । १२ सूर्यः । १३ भव्यानां पद्मा श्रीर्यस्मात् तस्मिन् । १४ कुपाक्षिका एवोलूकाः । १५ दीपम् । १६ परमपदपथिकः । १७ वामांसस्थेन मनोज्ञगतिना वा ।

कथं मयैकेन च दक्षिणेन धोरिष्यते सा ननु तेणकेन ? ॥ ५८ ॥
अचिंतयित्वेति भेद/कृतिं द्राक् त्वमप्सर:केलिरसानसेवी: ।
न चेद् भवादृग्गुहितकारिपित्रा विमुच्यते किं पृथुको लघीयान् ? ॥ ५९ ॥
अकब्बरोऽयं नरराजरत्नं भवांश्च सर्वर्षिजनावतंस: ।
मिथश्च योऽभूद् युवयोर्निषंग: सुवर्णमण्योरिव वर्णनीय: ॥ ६० ॥
स जातवान् दत्तसमस्तसंपद् नृणां कृषीणामिव वारिवाह: ।
प्रकाशभाग् भानुमतेव लोको महस्विना तेन बभूव सर्व: ॥ ६१ ॥
मरुष्विवामर्त्यमहीरुह स जनेषु चासीत् सततं हिताय ।
कदाऽथ भावी सुखकृत् प्रजानां पयोरुहां दृष्ण इवोदय: स ? ॥ ६२ ॥
शशीव पक्षेण सितेतरेण कलाकलापं क्रमतो भतेह ।
स नाशितस्त्वां हरता विधात्रा जगत्पयोराशिविलासमूलम् ॥ ६३ ॥
विवाहिता श्रीमदकब्बराय वराय तात ! त्वयका द्विजेन ।
कृपाकनी रूपबलर्द्धिबीजं तथा यथार्थाद्भुतमंत्रभाजा ॥ ६४ ॥
यथा युतौ नित्यमिमावभूतां सुदंपती भावरसान् प्रपन्नौ ।
विनाऽस्ति न त्वां स परत्र मंत्र: स्मरन्नदम्तापमुपैम्यहं ही ! ॥ ६५ ॥
—युग्मम्

अकब्बरो बब्बरवंशजन्मा त्वैयीद्धबुद्धिर्भृशमस्ति भूप: ।
सुभक्तिभाजस्त्वयि येऽसुभाज: स तानमून् स्वानिव पाति नित्यम् ॥ ६६ ॥

---

१ वत्सकेन । २ लघीय:स्वरूपाम् । ३ बाल: । ४ युवयो: सङ्ग: । ५ सङ्गेन । ६ सुरतरु: । ७ सङ्ग: । ८ रवे: । ९ युवयो: सङ्ग: । १० दीप्तमति: ११ प्राणिन: ।

अभूद् यदारोह इहास्तिकानां सुदुर्लभः कल्प इवौऽनयानाम् ।
स सिद्धशैलो भगवन्? भवद्वाक्प्रदीपसोद्द्योतहृदा व्यधायि ।। ६७॥
अवनीश्वरेणाऽवनिवल्लभेन यदार्हतानां करसाद् नितांतम् ।
सुधांशुतुल्या तव कीर्तिरेषा विशेषविद्भिर्लिखिताऽर्कबिम्बे ॥ ६८॥
—युग्मम् ।

कृपाक्षिकव्यूहवचोऽम्बुवाहात् सपङ्कमासीज्जनचित्ततोयम् ।
विभो ! भवद्वार्कतकाऽच्छचूर्णप्रयोगतस्तद् विमलं बभूव ॥ ६९ ॥
ततस्तदन्तः सदसच्च वस्तु जिनोदितं तात ! तवाऽनुभावात् ।
उपैति सर्वं प्रतिबिम्बभावं पयोनिधौ बिंबमिवाऽमृतांशोः ॥ ७० ॥
त्वयि प्रदीपे प्रकटप्रभावे गतेऽस्तमस्तान्ध्यभरप्रसारे ।
अथातिमात्रं कलिकालदोषागमात् तमो भूरि भविष्यतीह ॥ ७१ ॥
मुदं मम त्वन्मुखपुंडरीकं निपीय या दृग्भ्रमरी बभार ।
अनन्यवृत्तेस्तदभावतोऽस्या मरौ मराल्या इव किं रतिः स्यात्? ॥७२॥
चिरं शुचिर्या मम दृक्चकोरद्वयी पपौ त्वद्वदनेन्दुबिम्बम् ।
अथेयमस्याः प्रलयं प्रयाता कथं पिपासा बहुकालजन्मा ? ॥ ७३ ॥
पितस्तवाऽत्यद्भुतसंयमस्य फलं स्फुरद् निर्वृतिरेव वच्मः ।
यदप्सरोभूसुखभूरभूस्त्वं कलेर्बलीयः किल जृम्भितं तत् ॥ ७४ ॥
तपो जपो ब्रह्म च हर्षकृद् मे मुमुक्षुधर्मः सुभग प्रियश्च ।
यदीत्यभाणीर्भगवन्! मुधा तद् विहाय सर्वं यदभूः स्वरिच्छुः ॥७५॥

१ दुर्भाग्यानाम् । २ शत्रुञ्जयः । ३ हस्तायत्तः । ४ कतकाख्यफलस्य निर्मलचूर्णस्य । ५ मोक्षः । ६ देवाङ्गनाजातसुखस्थानम् । ७ साधुधर्मः ।

नवो भवच्छोचनदन्दशूको दुरन्तसन्तापविषापहारि ।
तवाभिधानं स्मरतां निहन्ति यदाशु चैतन्यमशेषमेष: ॥ ७६ ॥

त्वया प्रदीपेन तमोहरेण प्रकाशितं यज्जिनशासनौकः ।
न तत्र मिथ्यात्विभुजङ्गचक्षुर्हतिस्तदीयाहतये बभूव ॥ ७७ ॥

यदीयहृद्यस्ति तवाभिधानं मुनीन्द्र ! तेषां त्वमिहासि साक्षात् ।
निरीक्ष्य लेखाक्षरमत्र लोको वयस्यमायातमिवाऽवगच्छेत् ॥ ७८ ॥

इति क्षरन्नक्षिजलं विलापादेवग्रहादब्द इवाऽम्बुवृष्टेः ।
समस्तसंघाग्रहतो व्यरंसीत् सुधीरनूचानशिरोऽवतंसः ॥ ७९ ॥

—विजयप्रशस्त्याम् स० १४

---

१ शोकाहिः । २ गृहम् । ३ तदुपघाताय । ४ मित्रम् । ५ मेघविघ्नरूपाद् वृष्टिरोधात् ।

[४१]

श्रीवीरजिनेश्वरवियोगे

नन्दिवर्धनस्य विलापः ।

त्वया विना वीर ! कथं व्रजामो ? गृहेऽधुना शून्यवनोपमाने ।
गोष्ठीसुखं केन सहाचरामो ? भोक्ष्यामहे केन सहाऽथ बन्धो ! ॥१॥
सर्वेषु कार्येषु च वीर वीरे–त्यामन्त्रणाद्दर्शनतस्तवार्य ! ।
प्रेमप्रकर्षादभजाम हर्षं, निराश्रयाश्चाऽथ कमाश्रयामः ? ॥ २ ॥
अतिप्रियं बान्धव ! दर्शनं ते, सुधाऽञ्जनं भावि कदाऽस्मदक्ष्णोः ? ।
नीरागचित्तोऽपि कदाचिदस्मान्, स्मरिष्यसि प्रौढगुणाभिराम ! ॥३॥

—कल्पसूत्रसुबोधिकावृत्तौ पृ० ११३

[४२]

श्रीमहावीरप्रभुनिर्वाणे गौतमस्य विलापः ।

प्रसरति मिथ्यात्वतमो, गर्जन्ति कुतीर्थिकौशिका अद्य ।
दुर्भिक्षडमरवैरादि–राक्षसाः प्रसरमेष्यन्ति ॥ १ ॥
राहुग्रस्तनिशाकर-मिव गगनं दीपहीनमिव भवनम् ।
भरतमिदं गतशोभं, त्वया विनाऽद्य प्रभो ! जज्ञे ॥ २ ॥
कस्यांह्रिपीठे प्रणतः पदार्थान्, पुनः पुनः प्रश्नपदीकरोमि ?
कं वा भदन्तेति वदामि ? को वा, मां गौतमेत्याप्तगिराऽथ वक्ता ? ॥३॥

हा ! हा ! हा ! वीर ! किं कृतं ? यदीदृशेऽवसरेऽहं दूरीकृतः, किं मांडकं मण्डयित्वा बालवत्तवाञ्चलेऽलगिष्यं ? किं केवलभागममार्गयिष्यं ? किं मुक्तौ सङ्कीर्णं अभविष्यत् ? किं वा तव भारोऽभविष्यत् ? यदेवं मां विमुच्य गतः, एवं च 'वीर ! वीर !' इति कुर्वतो वी- इति मुखे लग्नं गौतमस्य,

—कल्पसूत्रसुबोधिकावृत्तौ पृ० १३७

---

१ उलूकाः । २ अवस्कन्दः ।

[४३]

गर्भनिश्चलत्वे त्रिशलाया विलापः ।

ततो–भगवतो निश्चलावस्थानानन्तरं तस्यास्त्रिशलाक्षत्रियाण्या अयमेतद्रूपो यावत् अध्यवसायः समुत्पन्नः, कोऽसौ ? इत्याह-हृतो मे-मदीयः स गर्भः किं केनचिद्देवादिना हृतः ?, अथवा स मे गर्भः किं मृतः ? अथवा स मे गर्भः किं च्युतो ? गर्भस्वभावात् परिभ्रष्टः, अथवा स मे गर्भः किं गलितः ?-द्रवीभूय क्षरितः, यस्मात्कारणात् एष मे गर्भः पूर्वं एजते-पूर्वं कम्पमानोऽभूत्, इदानीं नैजते-न कंपते इतिकृत्वा-इति हेतोः उपहत–कलुषीभूतो मनःसंकल्पो यस्याः सा तथा चिंता–गर्भहरणादिविकल्पसंभवा अर्त्तिस्तया यः शोकः स एव सागरः–समुद्रस्तत्र प्रविष्टा–ब्रुडिता, अतएव करतले पर्यस्तं-स्थापितं मुखं यया सा तथा, आर्त्तध्यानोपगता भूमिगतदृष्टिका ध्यायति, अथ सा त्रिशला तदानीं यद् ध्यायति स्म तल्लिख्यते---

सत्यमिदं यदि भविता, मदीयगर्भस्य कथमपीह तदा ।
निष्पुण्यकजीवाना–मवधिरिति ख्यातिमत्यभवम् ॥ १ ॥

यद्वा चिंतारत्नं, न हि नन्दति भाग्यहीनजनसदने ।
नाऽपि च रत्ननिधानं, दरिद्रगृहसंगतीभवति ॥ २ ॥

कल्पतरुर्मरुभूमौ, न प्रादुर्भवति भूम्यभाग्यवशात् ।
न हि निष्पुण्यपिपासितनृणां, पीयूषसामग्री ॥ ३ ॥

हा धिग् ! धिग् ! दैवं प्रति, किं चक्रे तेन सततवक्रेण ? ।
यन्मे मनोरथतरु–र्मूलादुन्मूलितोऽनेन ॥ ४ ॥

आत्तं दत्त्वापि च मे लोचनयुगलं कलङ्कविकलमलम् ।
दत्त्वा पुनरुद्दालितमधमेनाऽनेन निधिरत्नम् ॥ ५ ॥
आरोप्य मेरुशिखरं, प्रपातिता पापिनाऽमुनाऽहमियम् ।
परिवेष्याऽप्याऽऽकृष्टं, भोजनभाजनमलज्जेन ॥ ६ ॥
यद्वा मयाऽपराद्धं भवान्तरेऽस्मिन् भवेऽपि किं ? धातः ।
यस्मादेवं कुर्वन्नुचिताऽनुचितं न चिन्तयसि ? ॥ ७ ॥
अथ किं कुर्वे ? क्व च वा, गच्छामि ? वदामि कस्य वा पुरतः ? ।
दुर्दैवेन च दग्धा, मुग्धा जंग्धाऽधमेन पुनः ॥ ८ ॥
किं राज्येनाऽप्यमुना ? किं वा कृत्रिमसुखैर्विषयजन्यैः ? ।
किं वा दुकूलशय्याशयनोद्भवशर्महर्म्येण ? ॥ ९ ॥
गजवृषभादिस्वप्नैः, सूचितमुचितं शुचिं त्रिजगदर्च्यम् ।
त्रिभुवनजनासपत्नं, विना जनानन्दिसुतरत्नम् ॥ १० ॥ युग्मम् ॥
धिक् संसारमसारं, धिग्दुःखव्याप्तविषयसुखलेशान् ।
मधुलिप्तखड्गधारा—लेहनतुलितानहो ललितान् ॥ ११ ॥
यद्वा मयका किंचित्तथाविधं दुष्कृतं कृतं कर्म ।
पूर्वभवे यदृषिभिः, प्रोक्तमिदं धर्मशास्त्रेषु ॥ १२ ॥
पसुपक्खिमाणुसाणं, बाले जोऽवि हु विओअए पावो ।
सो अणवच्चो जायइ, अह जायइ तो विवज्जिज्जा ॥१३॥

१ भक्षिताः । २ पशुपक्षिमानुषाणां बालान् योऽपि च वियोजयति पापः ।
सोऽनपत्यो जायते अथ जायते ततो विपद्येत ॥

तत् पङ्का मया किं, त्यक्ता वा त्याजिता अधमबुद्धया ? ।
लघुवत्सानां मात्रा, समं वियोगः कृतः किं वा ? ॥ १४ ॥
तेषां दुग्धापायोऽकारि मया कारितोऽथवा लोकैः ।
किं वा सत्रालकोन्दुरु—बिलानि परिपूरितानि जलैः ? ॥ १५ ॥
किं वा साण्डशिशून्यपि, खगनीडानि प्रपातितानि भुवि ।
पिकशुककुर्कुटकादेर्बालवियोगोऽथवा विहितः ॥ १६ ॥
किं वा बालकहत्याऽकारि सपत्नीसुताद्युपरि दुष्टम् ।
चिन्तिमचिन्त्यमपि वा कृतानि किं कार्मणादीनि ? ॥१७॥
किं वा गर्भस्तम्भनशातनपातनमुखं मया चक्रे ? ।
तन्मन्त्रभेषजान्यपि, किं वा मयका प्रयुक्तानि ? ॥१८॥
अथवा भवान्तरे किं ? मया कृतं शीलखण्डनं बहुशः ।
यदिदं दुःखं तस्माद्विना न संभवति जीवानाम् ॥ १९ ॥

यतः—

कुरंडरंडत्तणदुब्भगाइं, वंज्झत्तनिंदूविसकन्नगाइं[1] ।
लहंति जम्मंतरभग्गसीला[2], नाऊण कुज्जा दढसीलभावं ॥२०॥
एवं चिंताऽऽक्रांता, ध्यायंती म्लानकमलसमवदना ।
दृष्टा शिष्टेन सखी-जनेन, तत्कारणं पृष्टा ॥ २१ ॥
प्रोवाच साश्रुलोचनरचना निःश्वासकलितवचनेन ।
किं मन्दभागधेया, वदामि ? यज्जीवितं मेऽगात् ॥ २२ ॥

---

१ कुरण्डत्वरंडत्वदुर्भगत्वानि वन्ध्यत्वनिंदु (मृतापत्यप्रसूः) विषकन्यकत्वादि । लभन्ते जन्मान्तरभग्नशीला ज्ञात्वा कुर्यात् दृढशीलभावं ॥

२ जम्मंतरे खंडिअसीलभावा इति तृतीयपादपाठः पुस्तकान्तरे ।

सख्यो जगुरथ रे सखि !, शान्तममङ्गलमशेषमन्यदिह ।
गर्भस्य तेऽस्ति कुशलं, नवेति वद कोविदे ! सत्यम् ॥ २३ ॥
सा प्रोचे गर्भस्य च, कुशले किमकुशलमस्ति मे सख्यः ! ।
इत्याद्युक्त्वा मूर्च्छामापन्ना पतति भूपीठे ॥ २४ ॥
शीतलवातप्रभृतिभिरुपचारैर्बहुतरैः सखीभिः सा ।
संप्रापितचैतन्योत्तिष्ठति विलपति च पुनरेवम् ॥ २५ ॥
[1]गरुए अणोरपारे रयणनिहाणे अ सायरे पत्तो ।
छिद्दघडो न भरिज्जइ, ता किं दोसो जलनिहिस्स ? ॥ २६ ॥
[2]पत्ते वसन्तमासे, रिद्धिं पावंति सयलवणराई ।
जं न करीरे पत्तं, ता किं दोसो वसंतस्स ? ॥ २७ ॥
[3]उत्तुंगो सरलतरु, बहुफलभारेण नमिअसव्वंगो ।
कुज्जो फलं न पावइ, ता किं दोसो तरुवरस्स ? ॥ २८ ॥
समीहितं यन्न लभामहे वयं, प्रभो ! न दोषस्तव कर्मणो मम ।
दिवाऽप्युलूको यदि नावलोकते, तदा स दोषः कथमंशुमालिनः ?
॥ २९ ॥

---

१ गुरुकेऽनर्वाक्पारे रत्ननिधाने च सागरे प्राप्तः ।
छिद्रघटो न भ्रियते तर्हि किं दोषो जलनिधेः ? ॥

२ प्राप्ते वसन्तमासे ऋद्धिं प्राप्नोति सकलवनराजी ।
यन्न करीरे पत्रं तर्हि किं दोषो वसन्तस्य ? ॥

३ उत्तुङ्गः सरलतरुर्बहुफलभारेण नतसर्वांगः ।
कुब्जः फलं न प्राप्नोति तर्हि किं दोषस्तरुवरस्य ? ॥

अथ मे मरणं शरणं, किं कारणं विफलजीवितव्येन ? ।
तत् श्रुत्वेति व्यलपत, सख्यादिः सकलपरिवारः ॥ ३० ॥
हा ! किमुपस्थितमेतत्, निष्कारणवैरिविधिनियोगेन ।
हा ? कुलदेव्यः क्व गता ? यदुदासीनाः स्थिता यूयम् ॥ ३१ ॥
अथ तत्र प्रत्यूहे, विचक्षणाः कारयंति कुलवृद्धाः ।
शान्तिकपौष्टिकमन्त्रो-पयाचितादीनि कृत्यानि ॥ ३२ ॥
पृच्छन्ति च दैवज्ञान्, निषेधयन्त्यपि च नाटकादीनि ।
अतिगाढ़शब्दविरचितवचनानि निवारयन्त्यपि च ॥ ३३ ॥
राजाऽपि लोककलितः, शोकाकुलितोऽजनिष्ट शिष्टमतिः ।
किं कर्त्तव्यविमूढाः, संजाता मन्त्रिणः सर्वे ॥ ३४ ॥

—कल्पसूत्रसुबोधिकावृत्तौ पृ० ८२–८४

[४४]

श्रीरत्नाकरसूरेर्वैराग्यगर्भिताऽनुशयपञ्चविंशतिका।

श्रेयः श्रियां मङ्गलकेलिसद्म !, नरेन्द्रदेवेन्द्रनताङ्घ्रिपद्म ! ।
सर्वज्ञ ! सर्वातिशयप्रधान !, चिरं जय ज्ञानकलानिधान ! ॥ १ ॥
जगत्त्रयाधार ! कृपावतार !, दुर्वारसंसारविकारवैद्य ! ।
श्रीवीतराग! त्वयि मुग्धभावाद्विज्ञ! प्रभो! विज्ञपयामि किंचित् ॥२॥
किं बाललीला कलितो न बालः, पित्रोः पुरो जल्पति निर्विकल्पः? ।
तथा यथार्थं कथयामि नाथ!, निजाशयं सानुशयस्तवाग्रे ॥ ३ ॥
दत्तं न दानं परिशीलितं च, न शालि शीलं न तपोऽभितप्तम् ।
शुभो न भावोऽप्यभवद्भवेऽस्मिन्, विभो ! मया भ्रांतमहो मुधैव ॥४॥
दग्धोऽग्निना क्रोधमयेन दष्टो, दुष्टेन लोभाख्यमहोरगेण ।
ग्रस्तोऽभिमानाजगरेण मायाजालेन बद्धोऽस्मि कथं भजे त्वाम् ॥५॥
कृतं मयाऽमुत्र हितं न चेह-लोकेऽपि लोकेश ! सुखं न मेऽभूत् ।
अस्मादृशां केवलमेव जन्म, जिनेश ! जज्ञे भवपूरणाय ॥ ६ ॥
मन्ये मनो यन्न मनोज्ञवृत्तं त्वदास्यपीयुषमयूखलाभात् ।
द्रुतं महानंदरसं कठोरमस्मादृशां देव ! तदश्मतोऽपि ॥ ७ ॥
त्वत्तः सुदुष्प्राप्यमिदं मयाप्तं रत्नत्रयं भूरिभवभ्रमेण ।
प्रमादनिद्रावशतो गतं तत्, कस्याग्रतो नायक ! पुत्करोमि ॥ ८ ॥
वैराग्यरंगः परवंचनाय, धर्मोपदेशो जनरंजनाय ।
वादाय विद्याऽध्ययनं च मेऽभूत्, कियद् ब्रुवे हास्यकरं स्वमीश ! ॥९॥

---

१ स्वाभिप्रायम् । २ पश्चात्तापसहितः । ३ मनोहरम् । ४ महासर्पेण ।

परापवादेन मुखं सदोषं, नेत्रं परस्त्रीजनवीक्षणेन ।
चेतः परापायविचिंतनेन, कृतं भविष्यामि कथं विभोऽहम् ॥ १० ॥
विडंबितं यत्स्मरघस्मरार्ति–दशावशात्स्वं, विषयांधलेन ।
प्रकाशितं तद्भवतो ह्रियैव, सर्वज्ञ ! सर्वं स्वयमेव वेत्सि ॥ ११ ॥
ध्वस्तोऽन्यमन्त्रैः परमेष्ठिमन्त्रः कुशास्त्रवाक्यैर्निहतागमोक्तिः ।
कर्तुं वृथा कर्म कुदेवसंगादवांछि हि नाथ ! मतिभ्रमो मे ॥१२॥
विमुच्य दृग्लक्ष्यगतं भवन्तं, ध्याता मया मूढधिया हृदंतः ।
कटाक्षवक्षोजगभीरनाभिकटीतटीयाः सुदृशां विलासाः ॥ १३ ॥
लोलेक्षणावक्त्रनिरीक्षणेन, यो मानसे रागलवो विलग्नः ।
न शुद्धसिद्धान्तपयोधिमध्ये, धौतोऽप्यगात्तारक ! कारणं किम् ॥१४॥
अङ्गं न चङ्गं न गणो गुणानां, न निर्मलः कोऽपि कलाविलासः ।
स्फुरत्प्रभा न प्रभुता च काऽपि, तथाऽप्यहंकारकदर्थितोऽहम् ॥१५॥
आयुर्गलत्याशु न पापबुद्धिर्गतं वयो नो विषयाभिलाषः ।
यत्नश्च भैषज्यविधौ न धर्मे, स्वामिन्महामोहविडम्बना मे ॥१६॥
नाऽत्मा न पुण्यं न भवो न पापं, मया विटानां कटुगीरपीयम् ।
अधारि कर्णे त्वयि केवलार्के, परिस्फुटे सत्यपि देव ! धिग् माम् ॥१७॥
न देवपूजा न च पात्रपूजा न श्राद्धधर्मश्च न साधुधर्मः ।
लब्ध्वाऽपि मानुष्यमिदं समस्तं, कृतं मयाऽरण्यविलापतुल्यम् ॥१८॥
चक्रे मयाऽसत्स्वपि कामधेनुकल्पद्रुचिन्तामणिषु स्पृहार्तिः ।
न जैनधर्मे स्फुटशर्मदेऽपि, जिनेश ! मे पश्य विमूढभावम् ॥१९॥

१ अनर्थस्य । २ निजस्वरूपम् ।

सद्भोगलीला न च [1]रोगकीला, धनागमो नो [2]निधनागमश्च ।
दारा न [3]कारा नरकस्य चित्ते, व्यचिन्ति नित्यं मयकाऽधमेन ॥२०॥

स्थितं न साधोर्हृदि साधुवृत्तात्, परोपकारान्न यशोऽर्जितं च ।
कृतं न तीर्थोद्धरणादिकृत्यं, मया मुधा हारितमेव जन्म ॥ २१ ॥

वैराग्यरङ्गो न गुरूदितेषु, न दुर्जनानां वचनेषु शान्तिः ।
नाऽध्यात्मलेशो मम कोऽपि देव! तार्यः कथङ्कारमयं भवाब्धिः ॥२२॥

पूर्वे भवेऽकारि मया न पुण्यमागामिजन्मन्यपि नो करिष्ये ।
यदीदृशोऽहं मम तेन नष्टा, भूतोद्भवद्भाविभवत्रयीश ! ॥ २३ ॥

किं वा मुधाऽहं बहुधा [4]सुधाभुक्पूज्य ! त्वदग्रे चरितं स्वकीयं ।
जल्पामि यस्मात् त्रिजगत्स्वरूपनिरूपकस्त्वं कियदेतदत्र ॥ २४ ॥

दीनोद्धारधुरंधरस्त्वदपरो, नास्ते मदन्यः कृपा–
पात्रं [5]नात्रजने जिनेश्वर ! तथाप्येतां न याचे [6]श्रियम् ।
किं त्वर्हन्निदमेव केवलमहो सद्बोधिरत्नं शिवं,
श्रीरत्नाकर ! मंगलैकनिलय ! श्रेयस्करं प्रार्थये ॥ २५ ॥

—श्रीरत्नाकरपञ्चविंशतिका

इतिश्री करुणरसकदम्बके संस्कृतः
प्रथमखण्डः समाप्तः ।

१ रोगा एव कीलकाः । २ मृत्योः । ३ कारागाराणि । ४ देवाः । ५ इह लोके । ६ द्रव्यसम्पदम् ।

श्रीनेमिविज्ञानग्रन्थमाला

१	श्रीप्राकृतविज्ञानपाठमाला	रू० २—४—०
२	स्तंभनपार्श्वनाथमाहात्म्य	भेट
३	आरामसोहाकहा	भेट
४	धणवालकहा	भेट
५—६	करुणरसकदंबक	रू० १—८—०